Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

தனி பிரதி விலை ரூ. 4/-

संस्कृतविद्यासमिति - पत्रिका

संस्कृतश्रीः

ஸம்ஸ்க்ருதஸ்ரீ:

SAMSKRITASRI

A MONTHLY JOURNAL OF SAMSKRIT EDUCATION SOCIETY

NOVEMBER 2007



ஸ்ரீசக்தி வடிவேலன்

ஸம்ஸ்க்ருதக் கல்விக் கழகம் மாத இதழ்

148-150 லஸ் சர்ச் ரோடு,

மயிலாப்பூர், சென்னை - 600 004

CC-0. In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

THE SAMSKRIT EDUCATION SOCIETY (Regd.) CHENNAI

Office:New No-148/150, Old No. 98/99, Luz Church Road, Mylapore Chennai-4.
(2466 14 01

List of Office Bearers

President : Vaidya Sri S.V. Radhakrishna Sastri
Vice Presidents : Smt. Sarojini Varadappan,
Sri M .S. Sivasubramanian, Sri Dr. Nanditha C. Krishna
Secretary & Treasurer: Sri G. SITHARAMAN, F.C.A.
Committee Members Sri V. Narayanan,
Sri S. Balaji, Sri T. A. Venkatesan, Dr. N.V. Vasudevachariar
Sri C.L. Venkatesan, Sri M.R. Gowrishankar,
Dr. C.L. Ramakrishnan, (I.P.S.Retd.,)
Sri S. Subramanian, One Representative from Kanchi Mutt
Editor and Publisher : S. SRINIVASA SARMA
Samskritasri : Plot 337, Muthiah Nagar, Annamalai Nagar P.O.-608 002

ஸம்ஸ்க்ருத எஜுகேஷன் ஸொஸைடி

வகுப்புகள் நடைபெறுமிடம் :- (1) ஸொஸைடி கார்யாலயம், போன் 2466 14 01. நடத்துபவர் : ஸ்ரீமதி லோகநாயகி ஸ்ரீநிவாஸன், M.A., M.Phil., சிரோமணி; (2) ஸ்ரீ V. ஸ்ரீநிவாஸாசார்யர், C-4, The Empress, 165, L.B. Road, திருவான்மியூர், சென்னை-41 போன் : 24480752. (3) ஸ்ரீமதி ஸீதா ஸ்ரீநிவாஸன், நெ.5, 4th Seaward Street, வால்மீகி நகர், சென்னை-41,Ph:24910647 (5) ஸ்ரீமதி B மாலதி, 155, லஸ் சர்ச் ரோட், "Tan Homes Apartment, Mylapore, Chennai-4 Ph : 24986099; (6) ஸ்ரீமதி கௌரி கருணாகரன், 4/1, Cenotaph 1st Lane, Chennai-600 018, Ph:24320544, (7) ஸ்ரீமதி R. முத்துலக்ஷ்மி, Flat No.4, 1st Floor, z¶¦ÁB Aparts., No.9, மமன்ஞ கார்டன் தெரு, ஆழ்வார்ப் பேட்டை, சென்னை-18, Ph:24994811, (8) ஸ்ரீமதி S. சாரதாம்பாள், ஸ்ரீ பூர்ணாநந்த யோகினீ பீடம், 1-31, மாக்மில்லன் காலனி, நங்கநல்லூர், சென்னை-61 Ph:22241562; (9) "Sath Sampradaya Samrakshini Sabha (Regd.), 43A/3, Asramam Road, Srimad Poundrikapuram Swamy Asramam, SRIRANGAM - 620 006 (Trichy) Ph: 2436100 (10) ஸ்ரீ A. ஸுப்ரஹ்மண்ய சர்மா, ஜகத் குரு வித்யாஸ்தானம், காஞ்சீ காமகோடி மடம், வடக்கு வீதி, திருவானைக் கோவில், திருச்சி-5, போன் : 223 13 43. (11) ஸ்ரீ மாலோல வாகீசவாணீ, New 174, Old 93) ஹபிபுல்லா ரோடு, தி.நகர், சென்னை-17, Ph: 28143406. (13) M.S. Madhavan, Plot No.B-18, New 27, 5th St., Lakshmi Nagar, Nanganallur, Chennai -61, Ph:22245858.

பாட புத்தகங்கள் கிடைக்குமிடம் : 1, ஸொஸைடி கார்யாலயம், மயிலாப்பூர்-4. (2) ஜயலக்ஷ்மீ இண்டோலாஜிகல் புக் ஹவுஸ், 6, அப்பர் ஸ்வாமி கோவில் தெரு, மைலாப்பூர், சென்னை-4, போன்: 24990539. (3) பவானி புக்ஸெண்டர், 19, ஸ்டேஷன் ரோடு, Westmembalam, Chennai-33, Ph:24748124.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

संस्कृतश्रीः

माला : 30 NOVEMBER-2007 पुष्पम् 12

कलिः 5108 सर्वजित्-आश्वयुजमासे 30॥12

The Sanskrit Education Society established with the blessings of His Holiness SRI MAHASWAMIGAL of Kanchi Kamakoti Peetam in the year 1957.

OFFICE:

No. 283, T.T.K. Salai Alwarpet, Chennai-18 and New No. 148-150 Luz Church Road, Mylapore, Chennai-4

PRESENT ACTIVITIES

1. Assisting study of Sanskrit.
2. Publication of books and monthly journal SAMSKRITASRI.

SAMSKRITASRI
Founder Editor
Vaidyasri
S.V. RADHAKRISHNA SASTRI,
Hon. Editor.
Dr. N. VEEZHINATHAN

Editor and Publisher
Dr.S.SRINIVASA SHARMA
Hon.Acadamic Advisor
SRI.P.S.RAMAMOORTHY,
Egmore Sanskrit School

Associate Editors :

Pandit Tediyur
S. Krishnamurthy Sastri
Pandit S. Ranganatha Sharma

विषयाः पुटे

1. श्रीकल्पकाम्बिकास्तवः ... 2
2. पूज्यश्री शङ्करविजयेन्द्रसूक्ति-तरङ्गिणी..... 5
3. एको रसः करुण एव। 8
4. मूकपञ्चशतीपाठविमर्शः .. 12
5. जामातृभाग्यम्। 15
6. अहं शिलातलं अधिशिश्ये 19
7. मुक्तकम्..... 22
8. विवेकः 24
9. चाटुगाथाचतुश्शती-२० . 27
10. चण्डीशतकम्..... 30
11. किं कष्टं व्यवसायिनाम्? 35
12. रूपात् गुणो गरीयान्! . 37
13. विशिष्ट वार्ता 39

SUBSCRIPTION RATES

ANNUAL : Rs. 40/-
LIFE SUBSCRIPTION Rs. 400/-
Page Donation Rs. 200/-

Subscription and donations may be sent in the form of crossed D.D./Drawn in favour of the Secretary and Treasurer, The Samskrit Education Society (Regd.) 148-150 Luz Church Road, Mylapore, Chennai-600 004.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

॥ श्रीः ॥

श्री कल्पकाम्बिका षोडशमालास्तवः ॥

—पण्डित शे. रङ्गनाथशर्मा, चेन्नै।

काम्यार्थकल्पकलतां करुणापयोधिं
मन्दस्मितां स्मरहरस्य मनोऽभिरामाम्।
उत्तुङ्गरत्नमकुटां महिलाभिरिष्टाम्
सर्वाङ्गसुन्दरतनुं कलये च गौरीम्॥ १

सिन्दूरसुन्दरमुखीं कमनीयगात्राम्
मन्दारकुन्दकुसुमै र्महनीयवेषाम्।
बृन्दारकार्चितपदां भवभव्यपत्नीम्
आनन्दकल्पलतिकां प्रणमामि देवीम्॥ २

आचारशीलबहुलैरनुवेलमात्त-
पूजाविधानमुदितां प्रणमत्प्रसन्नाम्।
विज्ञानदानकुशलां विबुधैः प्रपन्नाम्
अज्ञाननाशनकरीमहमानतोऽस्मि॥ ३

भक्तत्रिषष्टिकवितेऽम्बकपालिभार्याम्
भक्तिप्रवाहमतुलं ददतीमधीशाम्।
धर्मार्थकाममथ मुक्तिपथञ्च लब्धुं
शक्तिप्रदां मम सदुक्तिभिरर्चयामि॥ ४

मद्राधिनाथतरुणीं मम चित्तसंस्थाम्
मन्द्रस्वरै र्मधुरभाषितवर्णितां ताम्।
मन्देऽप्यमन्दमतिताप्रतिदानदक्षाम्
वन्देऽहमन्तरदृशा नतकल्पवल्लीम्॥ ५

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सद्यः प्रसादिवरदाभयहस्तमुद्रां
सद्योऽभिजातवपुषोऽर्धहरां दयार्द्राम्।
विद्वन्मनस्सुमनसां प्रविकासहेतुं
सर्वात्मनाऽपि गिरिजां प्रणतोऽस्मि नित्यम्॥ ६

मायूरपिञ्छकलितोत्तमपट्टवस्त्रां
मायूरनाथ-हृदयङ्गम-धर्मपत्नीम्।
मायाविलास-धृतनैकसुरूपनाम्नीम्
मायाविमोचनकरीं प्रणमामि देवीम्॥ ७

वाणीरमाकरधृतासितचामराभ्यां
वीणामृदङ्गनिनदैरुपचर्यमाणाम्।
नौकारथे शशिशिखेन विराजमानां
नीराजयामि निखिलागमसारभूताम्॥ ८

गीतैस्सुबोधमधुरैः परितोष्य देवीं
सम्बन्धनामकबुधस्तदनुग्रहेण।
सर्पेण मारितसुतां समजीवयच्चे-
त्यत्रैव चित्रितमहो सुवचोऽभिरामम्॥ ९

कौमार-यौवन-वयोऽधिकताविकारैः
संमुग्ध-मर्त्य-परिरक्षण-बद्धदीक्षाम्।
आचार्यवर्ग-परिपूजित-पादपद्माम्
आराधयामि मनसा कलिकामधेनुम्॥ १०

श्रीवल्लभाभिलषितां द्रविडाभिभाषां
संवर्ध्य संस्कृतगिरञ्च सुभाषिताढ्याम्।
संपाद्य संस्तवमथो कविगायकानाम्
आनन्दिनीं स्तुतिगिराऽहमुदाहरामि॥ ११

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ओड्याण - हार - वलयाङ्गद - कर्णभूषा-
पादस्वरादि - वरभूषण - भूषिताङ्गीम् ।
कार्तस्वराभवदनेन विमोहयन्तीम्
आर्तस्वरापहरणाय नमामि देवीम् ।। १२

सङ्कल्पमात्र - वरदान - विशालभावात्
संहारमूर्तिमपि शङ्करतां नयन्तीम् ।
तद्वामभागनिलयां ललनाभिरामां
माधुर्यकल्पकलतां मनसा स्मरामि ।। १३

विश्वेश्वरप्रियकरीं विनयाभिगम्यां
व्यामोह - भङ्ग - निपुणां विगुणैरगम्याम् ।
स्वीयाङ्ग - सङ्ग - परितुष्ट - शिवेक्षितां तां
साष्टाङ्गपातमनिशं कलये भवानीम् ।। १४

मन्दग्रहादि - परिपीडित - मर्त्यवर्गान्
मातृस्वभावमुपदर्श्य विमोचयन्तीम् ।
पुन्नागवृक्षतल - पूजित - शैवलिङ्गां
मायूरकल्पकलतां महयामि भक्त्या ।। १५

मद्रापुरी - प्रतिवस - न्मनुनीतिनिष्ठैः
प्रेम्णा प्रतिष्ठितपदे स्थिरवासजुष्टाम् ।
शर्वाङ्गसक्त - गणनाथ - गुहाभिमृष्टां
सर्वार्थदाननिरतां शिरसा नमामि ।। १६

एतद्विनीत - कवि - रङ्ग - सुधर्मवल्ली-
स्तोत्रं च षोडशपदाङ्कितमर्थपुष्टम् ।
पुष्ट्यै च रोगशमनाय भुवौ समेषां
भूयाच्चिरं श्रुतिपदेडितभक्तियोगात् ।। १७

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

पूज्यश्री शङ्करविजयेन्द्रसूक्तितरङ्गिणी।

अद्य पुण्यमहः भवति। उत्सवश्चाद्य आघोष्यते। ईश्वरसपर्यायै अत्युत्तमं दिनम्। वैदिकमतं, कथं जीवनयात्रा अनुष्ठेया इति बोधयति। विषये अस्मिन् विविच्य प्रस्तावयामासुः प्रक्रियां आदि-शङ्करभवत्पूज्यपादाः। ते हि षण्मतस्थापनेन सर्वत्र परमात्मदर्शनं आत्यन्तिकमुपदिश्य, तदर्थं मनसः क्रमशः परिपाकायानुष्ठेयं प्रतिदिनमीश्वरपूजनं निर्धारयामासुः। अतः पूज्यपादान् षण्मतस्थापकाचार्यान् तान् साधवस्समाख्यापयन्ति।

कार्यारम्भकाले सर्वस्मिन् प्रथमतस्तत्कार्यस्य निर्विघ्नपरिसमाप्तिं प्रार्थयमानैः श्री विघ्नेश्वरपूजा कर्तव्या। तथा पूज्यमानः विघ्नेश्वरः न केवलं सर्वान् विघ्नानपोहति; परन्तु मानुष्यकजीवनयात्रायाः अत्यावश्यकं मार्गदर्शकं ग्रन्थं प्रसाध्य परमोपकारं प्रसादयामास। कथम् ? अर्थानुसन्धानपूर्वकमेव लिखितव्यमिति निर्बन्धं सहमान एव, स्वकीयमेकं दन्तं उत्पाट्य तेन महाभारतग्रन्थं लिखितवान् इति ऐतिहासिकाः। महाभारतं नामेतिहासः अस्माकं जीवनयात्रामार्गदर्शकः अतिमहान् उपादेयग्रन्थः। 'यन्नेहास्ति न तत्कचित्' - इति हि प्रसिद्धिः। तत्र अष्टादश पर्वाणि। प्रतिपर्व प्रथमे पुरुषार्थाः प्रतिपादिताः विचित्राभिः कथाभिः।

महाभारतमिक्षुकल्पम्। पर्वशब्दस्यार्थास्त्रयः कोशेषु दृश्यन्ते। अमापौर्णमास्यादिपर्वकालः, अध्यायः, इक्षुकाण्डः इति। महाभारते प्रतिपर्व नानारसस्यन्दिन्यः कथाः समाख्यायन्ते। 'कथं जीवनमनुष्ठेयम्, चित्तवृत्तिः कथं भवितव्या, अदाम्भिकत्वमुदारत्वं समदर्शित्वमित्यादि दैवसम्पत्समृद्धिः कथं सम्पाद्या - इति प्रतिपादनैकसारः आदर्शग्रन्थः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

महाभारतम् । श्रीव्यासमहर्षिणा क्रमशः निगद्यमानं तादृशं ग्रन्थमात्मीयेनैकेनोद्भिन्नेन विलिख्य दन्तेन, जनमनः प्रसादमनुजग्राह श्रीविघ्नेश्वरः ।

प्रतिदिनसन्ध्योपासनेन सवितुः सपर्या साधुभिः अनुष्ठीयमाना अनादिकालात्प्रसिद्धा अस्माकं पुण्यभूमौ ।

जगन्मातुः पौर्णमीपूजा विशिष्यते। वृक्षोपरि शाखायामासीनः मूलशाखामुच्छिन्दन्कश्चन, पश्चाज्जगदम्बाप्रसादेन महाकविः कालिदासः समजनि । तथा अमावास्यादिनं विस्मृत्य 'पौर्णमास्या' इति व्याहरते अभिरामभट्टाय स्वभक्ताय वस्तुत एव तद्वचनं सार्थकीकृत्य, पौर्णमास्यापरिवर्तनेन सर्वतोभद्रं कृतवती श्री अभिरामाम्बा । प्रायशः बालाम्बिका, धर्मसंवर्धिनी, ज्ञानप्रसूनाम्बा - इति समाख्याप्रसन्ना तत्र तत्रास्माकं दक्षिणापथमनुगृह्णाति अखिलाण्डनायिका ।

'स्तम्भेऽपि सन्निधत्ते भगवान्' - इति समर्थयमानं स्वभक्तमनुगृह्णन्भगवान् नारायणः 'विश्वं विष्णुः' इत्यन्वर्थयन्निव स्तम्भे सन्निधत्ते स्म इति कथा प्रसिद्धा ।

श्रीस्कन्दस्य माहात्म्यं, लीलाविभूतिश्च सर्वतो दक्षिणभारते स्थलविशेषेषु अनुभूयेते । ज्ञानदाता स्कन्दः स्वपितरमपि प्रणवार्थं प्रबोध्य माहात्म्यमाविश्चकार । श्रीमदादिशङ्करभगवत्पादाः जयन्तपुरमधितिष्ठन्तं स्कन्दं सभक्तिश्रद्धमाराधयन्तः अस्तुवत -

यथाऽब्धेस्तरङ्गा लयं यान्ति तुङ्गास्तथैवापदस्सन्निधिं सेवमाने ।
इतीवोर्मिपङ्क्तीर्नृणां दर्शयन्तं सदा भावये हृत्सरोजे गुहं तम् ॥ इति ।

'शं मङ्गलं करोति इति शङ्करः' इति व्युत्पत्त्यनुसारं श्रीसुब्रह्मण्योपासनं जगन्मङ्गलकारकं प्रास्ताविषुः श्री शङ्करभगवत्पादाः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भक्तिरेका भगवति प्रयुक्ता ज्ञानं मोक्षोपायं प्रदिशति। अतःप्रत्यहं मानवैः, आष्वार् - नायन्मारविरचितानि भासुरपद्यानि अर्थज्ञानपुरस्सरं गेयानि विशिष्य माणवैः । यतो माणवा एवायतौ ज्ञानवन्तः प्रख्यापयिष्यन्ति जगति सर्वत्र।

श्रावणमूलमद्यापि मधुरापत्तने उत्सवतया आघोष्यते । वृद्धायाः कृते, तत्प्रदत्तं सक्तुपिष्टं स्वीकृत्याशुतोषः परमेश्वरः मृदस्सञ्चिकाय इति पौराणिकी कथा। सर्वव्यापी भगवानिति प्रख्यापयितुमेषा लीलाविभूतिः कथायां प्रख्याप्यते । काञ्चीपुरे आन्ध्येन क्लिश्यमानं सुन्दरभक्तं अक्षिप्रदानेन अनुजग्राह भगवानिति कथा प्रसिद्धा।

शमदमादिभिस्सह श्रीपरमेश्वरे भक्त्या सर्वोन्नतं पदमपि प्राप्तुं शक्यते । जनास्सर्वे स्वस्वेष्टदेवतानां नाम सङ्कीर्तयन्तः, स्वस्वसम्प्रदायानुसारं ललाटचिह्नं धरन्तः भगवत्स्तोत्रपाठकैङ्कर्यपराश्च भूत्वा मनःप्रसाद-गौरवसर्वस्वभूयिष्ठं जीवनं अनुभूयासुः इत्याशास्महे।

(४.२.१९९६) तमदिने पाण्डिचेरिनगरे अरियाङ्कुप्पग्रामे महा-मारिक्षेत्रालय-पुनरुद्धारण-शङ्कुस्थापनपुण्यावसरे श्री बालस्वामिभिरनु-गृहीतस्य भाषणस्यायं सारांशः)

तत्तज्जगद्गीतगुणो महेन्द्रः उत्कृत्तपक्षं दधदिन्द्रवज्रम्।
मैनाकमेकं व्यजहादितीदं सोदर्यभावस्य फलं भवत्याः ॥

Indra is praised by those residing in the different worlds (as one who cuts off wings of mountains). He stands ready with weapon Vajra to strike the mountain Mainaka also. But is it not because of his being born as thy (Devi's) brother that Mainaka has been let off by Indra?

–Vrttamanimaala - MM. Painganadu Ganapathi Sastrigal. Verse-44

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एको रसः करुण एव

—श्रीसुन्दरराजः I.A.S., भुवनेश्वरम्

शोकं श्लोकमिषेण वर्णितमिदं प्रत्यक्षवृत्तान्ततः
आकर्ण्यानुभवं निजं च विविधं सञ्चिन्त्य सम्यग् बुधाः ।
दारिद्र्येण तथाऽन्यथा च करुणं लोके यदापद्यते
आलोच्य स्रुतमश्रु नेत्रयुगतः प्रावर्तयेयुश्चिरम् ।। १

जात्यन्धश्च कृतान्धवेषरचनो नेत्रे निमील्यात्मनो
द्वौ भिक्षू धृतकुण्डिकौ प्रतिदिनं छायाद्रुमूलाश्रयौ ।
पान्थैः कुण्डिकयोस्समं करुणया क्षिप्तं तु वित्तं पुनः
सर्वं वेषधरः प्रतार्य हरतीत्यन्धः कथं बुध्यताम् ।। २

पूर्वं रूप्यशतं सुवर्णवलयं हीराङ्गुलीयं ततः
भर्तुर्वेश्मनि चोरितं समभवत् चोरो न दुष्टः परम् ।
विश्वस्तस्सुचरित्रवान् अतिऋजुः कोऽप्येकदा सेवकः
मुष्णन् काष्ठमवेक्षितोऽथ घटितः पूर्वापराधैरपि ।। ३

सायाह्ने विकचं सुगन्धिकुसुमं मल्लीलतायां सितं
स्त्रीभिर्धारयितुं निजे कचभरे सोत्साहमाकाङ्क्षितम् ।
देवीपूजनतत्परैरपि जनैः पूजार्थमुत्कण्ठया
हन्तागत्य विलावितं विमथितं बालेन लीलावता ।। ४

लीलालोलुमुखालकेन ललिता स्वेदाम्बुजालाकुला
तीरे वारिनिधेः श्रमेण पुलिनैः क्लिन्नैस्ससौधं गृहम् ।
बाला काऽपि मुहुर्मुहुस्सृजति तं वारान्निधिः फेनिलैः
हासेन ग्रसते तरङ्गनिवहैस्सा हन्त भग्नोद्यमा ।। ५

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दृष्ट्वा निर्मलवस्त्रधारिधनिनो दीनो बुभूषंस्तथा
धीहीनो रजकाय धावनकृतेऽदाद्वस्त्रमेकं निजम् ।
वित्तं देयमुपार्ज्य देयदिवसे दत्वा गृहीत्वाऽम्बरम्
आगच्छत्यथ पंकिले पथि पटो वाताहतस्सोऽपतत् ।। ६

पान्थेभ्यस्समदत्त पर्णलतनुश्छायां य आश्वासिनीं
यश्शस्यानि बहून्यदात् स्वसमये तेषां क्षुधश्शान्तये ।
आवासं प्रददौ विहंगनिवहायान्योपकारी तरुः
छित्त्वा नीयत एष हा परिणतः कोऽप्यत्र नो रोदिति ।। ७

भुक्तं साधु मनश्च तृप्तमधुना गायामि तस्मादिति
मण्डूकः स्वरितै प्लुतैश्च रटितुं कैदारिके प्रोद्यतः ।
रावं तस्य निशम्य कोऽपि भुजगः तं भक्षयिष्यन् मुदा
सद्यः पृष्ठत एत्य तं स्ववदनेनैवाग्रहीत् हन्त हा मम ।। ८

आप्रातस्समयात् श्रमेण महता कृत्वाऽऽर्जनं सर्वतः
वित्तं शाकटिकेन संचितमभूत् नान्नं च तेनाशितम् ।
मध्येमार्गमुपागतैः कतिपयैः स्तेनैस्तदर्थार्थिभिः
दीनश्शाकटिकः प्रताड्य निहतो वित्तं च तच्चोरितम् ।। ९

पित्रो र्जरिताङ्गयोः पलितयोः भ्रातुर्भगिन्यास्तथा
स्वस्त्रीयस्य निजस्य लोचनपथान्निष्क्रम्य विस्रम्भतः ।
कान्ते कामवशे प्रियाधरसुधापनाय पीनायते
वक्षोजे परिरभ्य यत्नवति हा तत्रागता चेटिका ।। १०

वित्तोपार्जनहेतवे प्रियतमे कान्ते विदेशं गते
तन्वी प्रोषितभर्तृका प्रतिदिनं तत्पत्रमुपश्यति ।
एकस्मिन् दिवसे कुतोऽपि लिखितं केनापि दृष्ट्वाऽत्मने
हा नाथ क्व गतोऽसि हेति पतिताऽऽक्रुष्टैः पुनर्नोत्थिता।। ११

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

चञ्च्वा शुष्कतृणानि काष्ठशकलान्याहृत्य चैकैकशः
क्रौञ्चः कश्चन कान्तया सह बबन्धावासनीडं द्रुमे।
काले साऽण्डमसूत तौ च मुदितौ भ्रान्त्वा निवृत्तौ यदा
नीडं निर्मथितं तदण्डमभवत् पीतं बिडालेन तत्॥ १२

मृत्पात्री मलिनाम्बरः कृशवपुः भिक्षुः क्षुधा पीडितः
याचन् सर्वत आप पूर्वदिवसात्-शिष्टं किमप्योदनम्।
विश्रान्तः करवाणि भोजनमिति प्रादाय वीथ्यां चलन्
यानेनातिरयागतेन निहतो भुक्तं तदन्नं शुना॥ १३

बन्धुर्नास्ति गतिश्च नास्ति भुवने नाथो विपन्नश्च मे
एकोऽयं गतिरित्यतीव कृतया प्रीत्याऽम्बया वर्धितः।
वात्सल्यं त्वविचिन्त्य मातृसविधं हित्वा गतस्स क्वचित्
तं दीना परिदेवनैर्मृगयते नास्त्यस्य वार्ताहरः॥ १४

दारुण्यैकनिधिं विधिं तुदति हा रोगी च वृद्धो जनः
सप्राणस्य वपुर्विधे मम कुतो रोगैश्शनैः कृन्तसि।
व्याधिग्राहभिया सखा विमुखतां लोकश्च सावज्ञतां
पत्नी निस्स्पृहतां सुतोऽप्यदयतां याताः क्षते क्षारवत्॥ १५

जातश्चूततरौ वसन्तसमये रागान्वितस्सुन्दरः
हूतानेकपिको मृदुःकिसलयो वातेरितो नन्दति।
जानीते न तु कालदुर्गतिमयं येन क्रमेणाहतः
धूतः पीततनुः पतेदुत नरैर्लूयेत शीर्येत वा॥ १६

अज्ञानेन पथि स्थिते निपतितः कूपे पुराणे नरः
दुर्गन्धे द्रुमवल्लिपाशजटिले सर्पाकुले वारिणि।
क्रामन् पादकराहतैः स कथमप्यालम्ब्य भित्तिद्रुमं
प्रायेणोदतरद् यदा द्रुमयुतो भूयोऽपतद्वारिणि॥ १७

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

भ्रातः पश्य रसालवृक्ष फलने त्वं यावदात्तश्रमो
लोकोऽप्येष फलेषु तत्परतया त्वामेत्य सेविष्यते।
यावत्कालवशावशोषितदलः त्वं काष्ठवत् तिष्ठसि
तावन्निर्दयमानसैः परशुभिः छित्त्वा गृहं नेष्यसे॥ १८

एकाकी सुचिराय दुःखितमनाः पुंस्कोकिलः कोऽपि तत्
कान्तारे विचरन् कथंचन ददर्शान्ते प्रियां कामपि।
कृत्वा प्रेमकथाः प्रमोदविवशो यावत्समाशिलष्यति
तावत् किञ्चन शिल्पिना विरचितं शिल्पं तदित्यग्रहीत्॥ १९

प्रागुक्तं भवभूतिनामकविना स्वे नाटके विश्रुते
एकः कारुणिको रसस्तदितरे ये तद्विवर्तायिताः।
लोकोऽयं तदिहात्मनीनचतिते नानारसे निष्ठितं
सर्वान्तर्गतजीवकल्पकरुणं पश्यत्वितीदं कृतम्॥ २०

संस्कृतप्रणयिनः प्रियवाचकाः वर्धिष्णवः माणवाश्च !
सादरं मनसि कुरुत। यद्यपि विलम्बेन, प्रतीक्षते युष्मान्
विजयिनः पारितोषिकं किञ्चित्। प्रहेलिकाश्लोकः अधः दीयते।
युष्माभिरिदमेकं कर्तव्यम् - प्रहेलिकाया रहस्योद्भेदनं
प्रमाणपुरस्सरम्। प्रहेलिका श्लोकः एवम्—
स्यालः श्रीरामचन्द्रस्य श्रीकृष्णेन हतः कथम्।
प्रवक्ता सप्रमाणं यः प्राप्नुयात्पारितोषिकम्॥
डिसम्बर्मासस्यान्तिमं दिनं यावदवधिः प्रकल्प्यते
उत्तरप्रेषणाय। पत्रप्रेषणाय सङ्केतः—
The Editor, *Samskritasri*
337, Muthiah Nagar, Annamalai Nagar P.O.
Chidambaram-2

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मूकपञ्चशतीपाठविमर्शः ।

—आर्. बालकृष्णशास्त्री, काञ्चीपुरम् ।

श्रीकामाक्षीदेव्याः कृपाकटाक्षैः कविसार्वभौमतां प्राप्तः श्रीमूककविः पञ्चशतीं आर्या - कटाक्ष - पादारविन्द - मन्दस्मित - स्तुतिशतकैः प्रणिनायेति सर्वे संस्कृतज्ञाः जानन्ति । अन्यान्यालङ्कारैः परिकर्मिता तस्य पञ्चशती । एकस्यैव वस्तुनः भिन्नभिन्नत्वेन वर्णनं, न्यायतः न केवलमलङ्कारपौष्कल्यं, न केवलं शतमानसङ्ख्यां प्रत्युत कवेः प्रतिभाशक्तिं च परिपुष्णाति । आस्तिकानां भक्तानां च मनसि इष्टदेवतागतं भावं सातत्येन, नैर्भर्येण च पोषयति इति तु सर्वसाक्षिकम् ।

तादृशमहामहिमनि पञ्चशतीगते कटाक्षशतके पद्यमधस्तनं अस्मिन् लेखे विमृश्यते । त्रिषष्टितमं पद्यमिदं भवति—

कादम्बिनी किमयते न जलानुषङ्गं
भृङ्गावली किमुररीकुरुते न पद्मम् ।
किं वा कलिन्दतनया सहते न गङ्गां
कामाक्षि ! निश्चयपदं न तवाक्षिलक्ष्मीः ॥ -इति ।

पद्यस्यास्य उभयथा अर्थवर्णनं भवितुमर्हति । प्रथमम्– मेघमाला निराबाधे आकाशे प्रसरणशीला । तादृशी सा वृष्टिभूयंगता अन्ततः अम्बुसंरोधे जलेनानुषज्यते । भृङ्गावली, मकरन्दमन्विष्य पुष्पात्पुष्पं संचरन्ती अन्ततः पद्माख्यं स्थिरावासमुररीकुरुते । कलिन्दतनया यमुनाऽपि तावदेकाकिनी बहुदूरं प्रवहन्त्यपि अन्ततः गङ्गया सङ्गम्य सुस्थिरेव समाश्वसिति । सततं सञ्चरणशीलानां कदाचित् विश्रान्तिः कुत्रापि युक्तैव । तथैव, मेघमाला - भृङ्गाली - कलिन्दतनयाख्याः तिस्रः विश्रान्तिमनुभवन्ति, क्रमात् जले, पद्मे, गङ्गयाम् च । मूककविः किमुत वयमपि जानीमः - प्रकृत्या सुन्दर्याः अक्षिणी लोले लक्ष्मीरपि लोला इति ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

तादृशी देव्याः अक्षिलक्ष्मीः अत्यन्तं चञ्चला प्रतिभक्तं सञ्चरन्ती नूनं कुत्रापि विश्रान्तिमीहेतैव । भक्ताग्रेसरः कविः गूढं समनाक्स्मितं - 'अहमस्मि मूकः, मयि स्थिरा भूत्वा चिरं विश्रान्तिं लभस्व' इति तां कटाक्षलक्ष्मीं समाश्वासयन्निव पृच्छति देवीं; प्रार्थयते चैवम् । व्यङ्ग्यमर्यादया 'अनुमन्यस्व तव कटाक्षलक्ष्मीम्' – मयि विश्रान्तिसुखमनुभवतु साऽपि - इति ।

अन्यच्च - अत्र काकुस्वरोपस्कृतैः 'तव अक्षिलक्ष्मीः निश्चयपदं मां किं न अयते ? किं न उररीकुरुते ? किं न सहते? इत्यादितिङन्तैः कविगतायाः देवीरतेः गरिमा, तदनुसृतप्रार्थनायास्तारल्यं च ध्वन्यमानं रसिकानां मनांसि रञ्जयत्येव ।

द्वितीयतः - प्रथमे, द्वितीये, तृतीये च पादे अंशद्वयवत्त्वेन पठनीयमिदं पद्यम् । पादत्रये निश्चेयकोटिसमर्पकः प्रथमोंऽशः, तादृशनिश्चयस्य अयुक्तत्वबोधको द्वितीयोंऽशः । तथा च केनापि रूपेण निश्चेतुमशक्यत्वात्, हे कामाक्षि ! तव अक्षिलक्ष्मीः निश्चयपदं 'इदमेवेति निश्चयस्य विषयो न भवति' – इति चतुर्थपादार्थः सुसङ्गतो भवति । अत्र काव्यलिङ्गमलङ्कारः - 'समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्' इति तल्लक्षणम् ।

अयं भावः – अतिमनोज्ञकृष्णकान्तियुता कामाक्ष्या अक्षिलक्ष्मीः । कादाम्बिनी - भृङ्गावली - कलिन्दतनया अपि मनोज्ञकृष्णकान्तियुताः । तावन्मात्रेण कामाक्ष्यक्षिलक्ष्मीः कादम्बिनीत्वनिश्चयं, भृङ्गावलीत्व-निश्चयं कलिन्दतनयात्वनिश्चयं वा नार्हत्येव, तत्तद्वैलक्षण्यस्यापि स्फुटं भासमानत्वात् । प्रायेण एकस्य वस्तुनः अपरवस्तुत्वेन निश्चयः वास्तविकः न संभवतीति हेतोः आरोपरूप एव निश्चयोऽत्र विवक्षितः, सुप्रसिद्धवैलक्षण्यात् । तादृशः आरोपोऽप्ययुक्तः इति किंशब्दघटितादंशात् उपरितनेनांशेन प्रतिपाद्यते अत्र ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अपरं च– कादम्बिन्या (मेघमालया) हि जलानुषङ्गवत्या भूयते। हे कामाक्षि ! तव अक्षिलक्ष्मीस्तु जला(डा)नुषङ्गं नायते। डलयोरभेदात्, कादम्बिनीपक्षे लकारं, अक्षिलक्ष्मीपक्षे डकारं चाश्रित्य समर्थनीयोऽयं प्रयोगः। तस्मादियं कादम्बिनीत्वनिश्चयं नार्हति । भृङ्गावल्या च उररीकृतपद्मया – स्वाभिलषितमकरन्दपानाय पद्माश्रितया भूयते । हे कामाक्षि ! तवाक्षिलक्ष्मीस्तु पद्मं नोररीकुरुते स्वयं पद्माधिकशोभावत्वात्। हीनशोभं पद्मं इतिकृत्वा तत् स्वगोष्ठ्यां नाङ्गीकरोतीति तात्पर्यम् । तस्मादियं भृङ्गावलीत्वनिश्चयं नार्हति। कलिन्दतनया तृतीया। साऽपि गङ्गासङ्गता भवति। हे कामाक्षि ! तव अक्षिलक्ष्मीस्तु गङ्गां न सहते, सापत्न्यरोषकालुष्यात्। तस्मादियं कलिन्दतनयात्वनिश्चयमपि नार्हति। सारतः, कस्यापि निश्चयस्य विषयो न भवति तव अक्षिलक्ष्मीः। अनुपमा लोकोत्तरा च सा इति फलति।

इदमवधेयम्— सापत्न्यनिबन्धनः गङ्गां प्रति शिवायाः कोपः कविसम्प्रदाये प्रसिद्धतरः; यद्यपि न वास्तविकः । स्वयं मूककवि ना कव्यन्तरैश्च वर्णितं गङ्गां प्रति शिवायाः सकोपत्वं, सोदाहरणं प्रदर्शयिष्यते अनन्तरे सम्पुटे।

प्रकृतविषये परिकरश्लोकोऽयम्—

यथावस्थितवर्णेऽपि पाठे कविमनोगतम्।
लेखेऽस्मिन्स्फोरितं स्पष्टं कमामात्रेण केवलम्॥

कमाचिह्नित पाठः एवम्—

कादम्बिनी किम् ?, – अयते न जलानुषङ्गं
भृङ्गवली किम्?,- उररीकुरुते न पद्मम्।
किं वा कलिन्दतनया ?, - सहते न गङ्गाम्
कामाक्षि ! निश्चयपदं न तवाक्षिलक्ष्मीः॥ इति।

(अनुवर्तते)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

जामातृभाग्यम्।

—शे. श्रीनिवासशर्मा

नीलकण्ठः । अस्य जन्मभूमिर्देवीपट्टणम् । प्रथमे वयसि वर्तमानस्याप्यस्य 'अमेरिका' (United States of America) नगरमधिकृत्य सहती महनीयतामतिरासीत् । तत्र गृहाः, वीथ्यो, गोपुराणि अन्यानि च सुवर्णमयीभिरिष्टकाभिराचितानीत्येव अस्य प्रायः प्रत्ययो बभूव। कथमपि 'अमेरिकादेशो द्रष्टव्य' इति मनीषा अस्य मेदुरा प्रादुरास। कथमिदमस्य सुसाधम् ? यतोऽस्य पिता धनुष्कोटिवास्तव्यः समापतद्भ्यो यात्रिकजनेभ्यः लब्धेन भैक्षेण जीविकां निर्वर्तयन्, कश्चन दीनः पुरोहितः। अथापि प्रातिवेशिकः ज्यौतिषिकः कश्चन वृद्धः, नीलकण्ठस्य जातकं परिशोध्य 'राजयोगोऽस्ति,' नियतमयं भविता कस्यचिद्देशस्य शासिता' - इति भावि शुभंयु दैवं निरूपयामास।

युवा नीलकण्ठः सुतरां व्यवसायपरः। पठितिनामग्रेसरो बभूव। 'श्रिया दुरापः कथमीप्सितो भवेत्' - इति पाठं व्यत्यस्य 'मयेप्सिता श्रीः किमहो दुरासदा' – इति पपाठ। एकवधूं काञ्चन कन्यां परिणीय, तद्वारा श्वशुरश्रीसम्मानितो भूत्वा सर्वोन्नतमात्मानं परिवर्तयितुमाचकाङ्क्ष । अल्पेतरेणोत्साहेन परीक्ष्यान्पाठान्पपाठ । ज्ञातव्यान्, मनसि धार्यांश्चांशान् सुदृढं चिन्तनैरावर्तनैश्च धारयामास । एम्.ए. परीक्षायां सर्वोत्तमतया जयं प्राप । ऐ.ए.एस्. परीक्षायां परीक्ष्येषु स्वयमन्यतमो भवितुमियेष। हन्त ! स मनोरथो न फलायाकल्पत। कारणं ज्ञातमेव। कथमपि अमेरिकानगरी गन्तव्या। समीहितं साधनीयमिति निश्चिकाय। क्षणमपि नैव विललम्बे । भगवान् भास्वानपि विहायावाचीं उदीचीं प्रतस्थे। प्रथमाश्रमिणां समुन्मेषसमयः समुल्ललास । सर्वतः कोलाहलः समुदजृम्भत।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

सुन्दरशास्त्री । अयं धूमशकटास्थान्यां नियुक्तः । क्रमशः द्वित्रोन्नतिमतीत्य इदानीमधिकारिपदं प्राप्तवान् । तस्य एकैव दुहिता । नाम्ना वासन्ती । वयसा, विद्यया, गुणेन, रूपेण, शोभया च स्पृहणीया । एकश्च पुत्रः द्वादशहायनो बालः । यद्यप्यायतिर्न स्फीता तथाऽपि मितंपचेन व्ययेन समधिकां सम्पदमयं समधिगतवान् इति ज्ञायते । स नीलकण्ठमन्तरेण बहुशः शुश्राव । दानीयं तममन्यत । वासन्ती नीलकण्ठाय दातव्या इति निरणैषीत् । यौतकं प्रति तु नाधिकं वक्तव्यम् । ऐ.ए.एस्. परिक्षावधिकस्य तत उच्चपरीक्षायाः कृते अमेरिकावस्थानस्य च यावदपेक्षितं तावद्धनं श्वशुरेण दातव्यमिति समयः कृतः । वासन्त्याः नीलकण्ठस्य च मिथः परिणयविधिः महता समारोहेण समपद्यत । नीलकण्ठश्चाविलम्बितं अमेरिकानगरं अमरायमाणः प्रतस्थे । तत्र गत्वा आचरणेन, आकृत्या, वेषेण, गत्या, भाषणेन, उच्चारणेन सर्वथा अमेरिकानगरजातां जनतां क्षिप्रमतिशिश्ये । यो यः पश्यति स सर्वोऽपि तं कमपि सुन्दरं श्वेतामेरिक-जात्यामेव लब्धजन्मानममन्यत । नीलकण्ठोऽपीदानीं असकृदात्मान-मधिकृत्य विमनायते स्म । अहो अपण्डितता विधेः ! । 'जनुषैवाहं कुतोऽमेरिकाजनो नाभवम् –' इति । तथाऽपि इण्डियाभूमौ लब्धजनुषो वासन्त्या रूपं, लावण्यं, वयश्च न तस्य चक्षुषोर्मनसि च नैव पुस्फोर । हन्त ! तत् एकमात्रमात्मनः हैन्दवत्वप्रकाशकं जातम् । तत्तादृशमात्मनो नामाऽपि तस्मै नारोचत । यत इदं सुदीर्घं परुषाक्षरघटितमसुखोच्चारणं प्रत्यभात् । स सद्य एव तत्तथाऽन्यथयति स्म यथा श्रवणमात्रेण तत् यत्किञ्चिदाङ्गलं नामेव भायात् । ननु कीदृशं तत् ? 'नैल्.ओ.केण्टन्' - इति । अपि तु, भीतिरियमेका नैव तं जातु जहौ यत् यत्किञ्चित् चिह्नमात्मनो जातिपिशुनं देशपिशुनं वा गूढं संलक्ष्येतेति ।

एको हायनः पूर्णः । नैल्.ओ.केण्टन् उपाधिकारिणःस्थाने

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

(Sub-Collector) नियुक्तः । प्रतिप्रयाणाय स मतिं चकार । आकाशयानमारुरोह । कथमपि एकस्मिन्वत्सरे द्वित्राणि पञ्चषाणि वा दिनानि श्वशुरगृहे वस्तव्यम् । न तु ततोऽधिकमेकमपि दिनम् । अन्यथा लाघवमिति मेने ।

श्वशुरः सुन्दरशास्त्री आत्मनः ऐ.ए.एस्. जामातरमधिकृत्य सचिन्तः स्थितः । दैवादहो ! काचन एस्.एम्.एस्. वार्ता । को विशेषः? 'ऐ.ए.एस् जामाता अमेरिकात अचिरान्निवर्तमानोऽस्ति' - इति । कथमिह कथनीयः वासन्त्यास्तदानीन्तनः कुतूहलस्यातिरेकः ? । दवीयसो द्वीपान्तरादावर्तमानं जामातरं प्रत्युद्यातुं सभाजयितुं च सुन्दरशास्त्री प्रहर्षातिरेकेण, आदरेण च महता प्रतीक्षाञ्चके । स तादृशः किल महान् कश्चन अतिथिविशेषः ! ।

चतुर्थवादनसमये तदीयमागमनं प्रतीक्षितम् । महान्संभ्रमः । अन्यादृशः कोलाहलः । अस्मदीयः नैल्.ओ. केण्टन् श्वशुरमन्यांश्च अलक्षितमतर्कितं चागत्य अकाण्डे विस्माययितुमियेष । श्वशुरगृहस्य पञ्चषकिलोमीटर्दूरे वर्तमाने धूमशकटस्थाने अवरुह्य, ततः केनचित् बाष्पयानेन प्रतीक्षितकालात् पूर्वमेव श्वशुरगृहमाययौ ।

प्रवहणशब्दो द्वारि शुश्रुवे । बालकः पुत्रः सरभसं गृहान्निर्गत्य सहस्ततालं समुग्धभावं च ऐक्षिष्ट । तदैव कोऽपि सुन्दरो युवा आप्रपदीनैकाकारप्रावारकवेष्टितः पिटकायमानशिरस्त्राणः प्रवहणादवरुहन्नासीत् । अहो आश्चर्यम् ! 'अमेरिकात आगत आवुत्तः' इत्युच्चैरुद्घोषयन् निपतन्नुत्पतन् अन्तः प्रविवेश सः । जामाता च सस्वागतं, ससभाजनं च प्रातिस्विकतया आरचिते अपवरके निवेशितः । कतिपयनिमेषानेव विस्रम्भालापाः स्वैरं प्रावर्तन्त । अभ्यागतं जामातरं वीक्षितुं बन्धवः पौराश्चाप्ताः सङ्घशः समाजग्मुः प्रतिजग्मुश्च । अत्रान्तरे जामाता विश्रान्ति सुखमनुभवितुं विविक्तं विसृष्टः ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

लोके यदि नाम यत्किञ्चित् प्रेयस्या वासन्त्या अपि समधिकतरं कमनीयं वस्तु नीलकण्ठस्य मानसीं वृत्तिं आवर्जयितुं ईष्टे स्म, तर्हि दिगन्तविश्रुतं सर्वबालजनमनोज्ञं तत्स्वादुतमं 'काराबून्दी' - नामकं भक्ष्यविशेषमतिरिच्य किमन्यद्भवेत्? अहो कष्टम् ! ब्रह्मणा सृष्टेषु इदं अतिस्पृहणीयं वस्तु सर्वत्रापि अमेरिकानगरे सुदुरासदमासीत्। यदाऽयं श्वशुरगृहमागच्छन् आसीत् तदा मध्येपथं किञ्चित् पथिकजनपेयगृहं (Hotel) अस्य नयनपथं गतम्। यद्यपि इन्द्याखण्डजं वस्तुजातं सर्वथा तस्य प्रद्वेषजनकं तथाऽपि यदा तत् श्रीमत्प्रेयः 'काराबून्दी' भक्ष्यकमस्य दृष्टिगोचरमभूत् तदा संस्कारजं चापलमवर्धत। जिह्वाग्रात् लालाबिन्दवः स्वयं निसुस्रुवुः। हा ! विचित्रा दैवगतिः। 'छिन्नेऽपि पुच्छे श्वा श्वैव न चाश्वो न च गर्दभः !। को वा जनुषा कृष्णं कुक्कुरं श्वेतयितुं प्रभवति?। चिरवासनावशात् तादृशं स्वादुसर्वस्वभूतं भक्ष्यमक्रीत्वा क्षणमप्यवस्थातुं नायमशक्नोत्। विदेश्यानां सम्प्रदायं आचारेणानुतिष्ठतां अग्रेसरो नीलकण्ठः पथि चरन् पृथग्जन इव तत् भक्ष्यं पश्यतां पुरः चर्वितुं नैव चकमे। (अनुवर्तते)

विश्वेषां नयनोत्सवं वितनुतां, विद्योतां चन्द्रमाः
विख्यातो मदनान्तकेन मुकुटीमध्ये च सम्मान्यताम्।
आः किञ्जातमनेन, हाससुषमामालोक्य कामाक्षि ते
कालङ्कीमवलम्बते खलु दशां कल्माषहीनोऽप्यसौ॥

தேவி காமாக்ஷி ! சந்திரன் எல்லோர் கண்களுக்கும் மகிழ்ச்சி விருந்தளிக்கட்டும், வானில் விளங்கட்டும்; மன்மதனின் எதிரியான சிவனால் மகுடத்தின் நடுவே வைத்து பெருமையடையச் செய்யட்டும்; எனினும் அதனால் எல்லாம் என்ன பயன்? களங்கமற்றவனாயிருந்தும் கூட, உனது சிறிப்பு அழகைக் கண்டு 'களங்கியானான்' என்ற நிலைக்கு அலலவா தள்ளப்பட்டுள்ளான் !

—ஸ்ரீமூககவி – மந்தஸ்மித சதகம் 30

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

अहं शिलातलं अधिशिश्ये ।

—वी. आदित्यशास्त्री, हैदराबाद्।

अहं ग्रीष्मकालविरामार्थं मम पितामहस्य ग्रामं अगमम् । मम पितामहः ग्रामे प्रमुखः आसीत्। तस्य गृहं अतिविशालं अभवत्। मन्ये, तदा तदा एकस्मात् प्रकोष्ठात् अन्यं प्रकोष्ठं गत्वा प्रतिनिवृत्त्यैव सः वृद्धः सञ्जातः इति । तस्य च गृहात् पश्चिमतः नन्दनवनं इव विराजमानं महत् उद्यानं एकं अवर्तत।

एकस्मिन् दिने अहं प्रातरुत्थाय, तटाके स्नात्वा, सार्धदशवादने अशेषं भुक्त्वा, निद्राक्रान्तः व्याघूर्णमानलोचनः, शयनार्थं रमणीयतरुच्छायां अन्विष्यन् उद्यानं प्राविशम्। तत्र च मध्ये बाणभट्टस्य शाल्मलीवृक्ष इव विराजमानः महान् वटवृक्षः आसीत्। तस्य छायाऽपि विशाला एव । अथ तस्य वृक्षस्य मूलभागे महत् शिलातलमेकं, निद्रया अर्धनिमीलितलोचनं मां शयनार्थं आह्वयत् इव आस्त । पदे पदे स्खलन्, अधः पतन्, पुनः उत्तिष्ठन्, भ्रमन्, विपरीतमार्गे धावन्, कथं कथमपि चिरकालात्परं शिलातलसमीपं अहं जगाम । ततः चिरकालपरिभ्रमणेन श्रान्तः अहं शिलातलस्य समीपे एव उपाशिम्।

तत्र मुहूर्तं उपविश्य, पुनः मन्दं मन्दं स्थित्वा, गलद्रस्रं अपि अविगणय्य उन्मत्त इव शिलातलं वीक्ष्य तस्योपरि उपविष्टवान् केवलम्।

सद्यः महता वेगेन कालः पृष्ठतः परिबभ्राम । चिरं परिभ्रम्य अन्ततः विरराम । अहं तु उपविष्टः एवासं न तु शिलातले; परन्तु सुवर्णसिंहासने । तच्च सिंहासनं मणिवज्रवैडूर्यैः खचितं, बर्हिपिच्छैः समलङ्कृतं चासीत्। सिंहासनमालोक्य चकितमतिः अहं झटिति तस्मात् अवरुह्य भीत इव समन्ततः दृष्टिजालान् प्राक्षिपम्। दाडिमचूतकदली-वटादिवृक्षाणां स्थाने अतिमहान्तः स्फटिकस्तम्भाः, वज्रैः

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मरकतमणिभिश्च खचितभित्तयः आविरभवन् । एकत्र पुनः आजानुबाहवः, असंस्कृतकेशपाशाः, रक्तलोचनैः दहन्त इव समस्तलोकजातं, सशस्त्राः रणोद्भटाः भटाः अवर्तन्त । तेषां दर्शनमात्रेण सीत्कृतं इवासीत् मनसा । सद्य एव दृष्टिं ततो निवार्य मम दक्षिणतः प्राहिणवम् । मम पुरस्तात् पार्श्वयोश्च सिंहासनेषु उपविष्टाः बहवः पुरुषाः आसन् । समेषां मध्ये वज्रकिरीटेण, सुवर्णकुण्डलाभ्यां, मुक्ताहारैः, रत्नकेयूरैः, दुकूलवस्त्रैश्च विभूषितः, अग्निरिव जाज्वल्यमानः, वन्दिनां जयघोषैः असकृत् संस्तूयमानः, अमूल्यरत्नैः खचितसिंहासने उपविष्टः राजा भोजः आसीत् ।

अथ च तं राजानं, तां च राजसभां निर्निमेषचक्षुषा पश्यन्तं मां, पार्श्वे उपविष्टः कश्चन पुरुषः समभाषत । 'भोः कः भवान्? कुतः आयातः?' इति । राज्ञः दर्शने लग्नां मम दृष्टिं बलात्कारेण वामतः परिवृत्त्य अहं तं पुरुषं अद्राक्षम् । सद्यः मम हृदयं व्यस्फुटदिव । स आसीत् कविकुलतिलकः कालिदासः । तं दृष्ट्वा किमपि विवक्षुः अहं मुखमुन्नम्य यदैव अवोचं तदैव राजा भोजः उच्चैः एवमकथयत् - 'भो भोः अत्र सन्निहिताः महाकवयः!। ह्यः सभायां भवन्तः सर्वे 'अहं शिलातलमधिशिश्ये' इति विषयमधिकृत्य सम्यक् समभाषन्त; अद्य समस्यापूर्तिस्पर्धा प्रचलतु । श्लोकस्य चतुर्थपादस्तावत् - 'जातः पुत्रो मातरं हन्ति वृद्धां' इति । यः कविः अत्यधिकश्लोकान् रचयति सः तत्परिमितं धनं प्राप्स्यति । इति राज्ञः वचनं निशम्य मम यदन्तः तद्बहिरिवाभवत् । संपूर्णतया पुलकितमासीत् मे शरीरम् । मुखमपि बिम्बफलमिव लोहितं अभवत् । न केवलं एतावता समापितम् । 'गण्डस्योपरि पिटकः संवृत्तः' इतिवत् 'सः राजा' मम वामतः स्पर्धा प्रारभतां इत्युक्त्वा प्रथमासने उपविष्टं मामेव तर्जन्या दर्शयन्नास्त ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

राज्ञः वचनं श्रुत्वा मम चक्षूंषि भयेन विपुलानि अभवन्। तस्य अङ्गुलिनिर्देशः मह्यं यमपाश इव भासते स्म। झटिति मम ज्ञानं विनैव अहं उच्चैः अरुदम् - 'नाहं किमपि जानामि। नाहं कविः। नाहं पण्डितः' इति अजल्पम्। तच्छ्रुत्वा सभायां सर्वेऽपि उच्चैः अहसन्। मम तु अन्तःकरणं क्षुभ्यमानं आसीत्। मरणमेव श्रेयस्करं इति मे बुद्धिः अभूत्। सर्वेऽपि पण्डिताः - 'भोः कुत्र अधीतं त्वया? कस्त्वं? कुतः रोदिषि? बालकोऽयं वैदेशिकः किं? भ्रान्तोऽसि किं? मूर्खोऽयं, इत्यादिवचनैः मां बहुधा उपाहसन्, अभर्त्सयन् च। तां अवहेलनां सोढुं अशक्तः अहं पण्डितसमाजे एव उच्चैः अरुदम्। तदा मां सान्त्वयितुं इव कश्चन पुरुषः रुदतः मम मुखे जलं प्राक्षिपत्। प्रबुद्धः अहं मम पितामहं अद्राक्षम्। समन्ततः दाडिमचूतकदलीवटादिवृक्षान् अपश्यम्। शिलातलात् अधः पतितं उच्चैः आक्रोशन्तं च मां दृष्ट्वा हसन्तीं मम पितामहीं अद्राक्षम्। झटिति अवगतवान् यत् 'अहं शिलातलं अधिशिश्रे' इति।

स्वदेशग्रामयोः पूर्वं मध्यमं जातिसंघयोः।
आक्रोशाद्देवचैत्यानां उत्तमं दण्डमर्हति॥

One who causes an offence to his country or village is considered as having committed a first rate crime and hence he must be punished severly while one causing harm to his class or Society should be punished in a moderate manner. However, he who causes harm to temples, should be given the highest punishment under the law.

—Kautilya - Arthasaastra-III-18 (last verse)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

मुक्तकम्।

—सम्पादकः

'आपदस्सन्तु नः शश्वत् यासु सङ्कीर्त्यते हरिः' – इति महाभारते द्रौपदी प्रार्थयामास इति वर्ण्यते। भक्ताः त्यागराजार्यप्रभृतयोऽपि दारिद्र्यं बहुमेनिरे इति इति न; दारिद्र्याभिभवे, आपदि, दुःखे चातितरां भक्ति-प्रभावस्तेषां समवर्धत इति शक्यं वक्तुम्। यतस्तेषां दारिद्र्यमन्यत् अस्मादृशां दारिद्र्यमन्यत्। भगवतः सान्निध्याभावः, सान्निध्यप्रतिरोधकः एव तेषां दारिद्र्यम्। लोके साधारणाः जनास्तु यद्यपदपेक्षितं मुख्यतया तस्य तस्याप्राप्तौ दारिद्र्यं मन्यन्ते। विद्या - दारिद्र्यं, वित्तदारिद्र्यम्, शब्ददारिद्र्यमित्यादि। एवं च दारिद्र्यं प्रतिव्यक्ति भिद्यते। केवलं धनाभाव एव दारिद्र्यमिति न। भक्तधौरेयस्य श्रीनारायणभट्टपादस्य आरोग्यदारिद्र्यमासीत्। ततश्च भगवन्तं प्रार्थयामास मुक्तकण्ठं भक्तिपरवशस्सन् तत् दारिद्र्यमपाकुरु इति।

इदानीं राष्ट्रपतिना सम्मानितः पण्डिताग्रेसरः तेदियूर् श्रीकृष्णमूर्तिशास्त्री सामान्येन दारिद्र्यं - मनसि वर्तमानं, मूर्धानमुन्नम्य तदा तदा बाधमानं तत्, यतः कुतोऽपि प्राप्तजन्मपरिपोषं - भगवन्तमनन्यमनस्कतया भजनीयत्वं प्रतिबोधयति; यस्य फलं विषादनालङ्काररीत्या स्वस्यैव - दारिद्र्यस्य - नाशः। यतो हि भगवान् प्रतिजानीते – अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।

तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ इति।

अस्तु। श्री शास्त्रिणः मुक्तकं तदर्थपुष्टमिदानीं विदांकुर्वन्तु–

'दारिद्र्यस्य दयालुत्वं रामचन्द्र! कथं ब्रुवे।
अनालोच्यात्मनो नाशं यद्भवन्तमदर्शयत्॥ - इति।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एकतो भक्तिप्रभावः, अन्यतो हास्यरसश्च चर्वणामात्रसाध्यः सहृदयानामुत्सवमनुत्तममातनोति।

अपि पाठकानामन्यतमेनापि स्वमनीषामञ्जूषिकायां निगूहितं एतादृशं मुक्ताफलमिव मुक्तकं यत्किमपि रक्षितं स्यात्? .....स्यात्। अवश्यं सहृदयपाठकानां प्रमोदाय प्रकाशयन्तु संस्कृतश्रीद्वारा !

गीतवादित्रनृत्यानां रक्तिः साधारणो गुणः।
अतो रक्तिविहीनं यत् न तत्सङ्गीतमुच्यते॥

The primordial charactristic of Vocal music, of instrumental music, and of dance is the production of harmoney with a pleasing effect.

—Sangitadarpanam I-6

प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं हितं राज्ञः प्रजानां च प्रियं हितम्॥

The happiness of the ruler rests on the welfare of his subjects. What is good and beneficial to the people will be of good and benefit to the ruler. The personal pleasure of a king is not good for him. The happiness and welfare of the people alone constitute his pleasure.

—Kautilya - Arthasaastra (I-18.5)

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विवेकः ।

—मधुकरः

'ही ही' । अयं कथमतिजागरूपमपि मां वञ्चयित्वा हासः बहिर्निष्क्रामति । परितस्तावत् पश्यामि किं यः कोऽपि नास्तीति । दैवात् कोऽपि नास्ति । विजने हि हसन्तं मां दृष्ट्वा उन्मत्तं मन्येरन् । परमात्मा सर्वव्यापी मामीदृशं पश्येदपि । परमदयालुस्सः । न स मामुन्मत्ततां प्रापयिष्यति ।

कथमयमकाण्डे मे हासः । अद्यतनीं मे दशां दृष्ट्वा स्वात्मैव मां हसतीव । अनन्तः विश्वरूपी परमात्मा । तस्य रोमकूपेषु बहूनि अण्डानि लम्बन्ते । तत्र एकैकस्मिन्नण्डे बहवो लोका इति श्रूयते । तादृशेषु लोकेष्वन्यतमोऽयं भूलोकः । अद्य कियद्विस्तृता इयं पृथिवी । बहवो ह्यत्र 'खण्डाः' सन्ति । प्रतिखण्डं बहवो देशाः । प्रतिदेशं बहव्यो राजधान्यः । प्रतिराजधानि बहूनि मण्डलानि । प्रतिमण्डलं बहवो जनपदाः । तत्र प्रत्येकं बहवो ग्रामाः । तत्र प्रत्येकं बह्व्यो वीथ्यः । तत्र बहूनि गृहाणि । तत्रैककस्मिन्गृहे बहवो मनुष्याः । तादृशेषु एकगृहाश्रयेषु मनुष्येषु परमदुर्बलोऽहं वर्ते । हहा ! सोऽहं कीदृशं मनोरथमकार्षम् । अविदित-याथातथ्यो लोको वृथा शोकसागरे मग्नोऽवसीदति । अस्य तावदुद्धारः कार्यः । पिपीलिकाः एवमन्ये च क्षुद्रजन्तवः कति न जायन्ते? कति न म्रियन्ते ! तद्चेत् मनुष्या अपि जायन्ते म्रियन्ते च तर्हि 'मनुष्य' इति को विशेषः । न शक्यं मया तूष्णीमासितुम् । तस्मात् तीव्रं प्रयतै । लोकमुद्धराणि - इति ।

गृहेषु नाभिरतिः । अर्थे नास्था । बन्धुषु नानुरोधः । देहे नादरः । परितो व्यचरम् । अशनायापिपासे असहे । बहूनपश्यम् । प्रार्थनादैन्यमवालम्बे । अधिक्षेपानसहे । अन्ते कथंचित् श्रोतॄन् उपालभे ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

उपन्यासानकरवम्। मासाः क्रमश अपागच्छन्। द्वित्राणि वर्षाण्यपि। 'न ह्यारम्भ एव प्रचितो यत्नः फलिनो भविता। अविच्छिन्नं यतितव्यम्। अन्ते मनोरथः पूर्णो भविष्यति' इति विवेकित्वाभिमानः मतिमनुवर्तयति स्म। वर्षगणोऽत्यगात्।

नैतावताऽपि पूर्वस्थितेर्मात्रयापि विशेषः। सर्वे यथापूर्वं परिवर्तन्ते। मामेव तु प्रति केचिदन्तर्हसन्ति। तन्मुखदर्शनं अकार्यं कृतवत इव ममाऽपि लज्जा भवति। न किमपि ते वाचा वदन्ति। अथाऽपि 'मूढेष्वग्रगण्य' इति तेषामभिप्रायः मां प्रति। तच्च तदा तदा स्फुटं प्रकाशते। जनान्तरवत् स्वगृहे स्वबन्धुदायादजनैः स्थित्वा सर्वसाधारणलोकयात्रानिर्वहणे कर्तव्ये सति तद्विहाय अधिकप्रसङ्गं कृत्वा निरालम्बनो ह्यद्य वीथ्यां पर्यटन्नासे। तस्मात् किमहं न मूढः?।

येषामल्पतरा मतिः, अल्पतरा योग्यता, अल्पतरः प्रयासः, तेऽपि नाम सुसुखमयं जीवनं निर्वर्तयन्ति। अस्ति गृहं स्वकीयम्। अस्ति धनं सहस्रशो निधिषु निहितम्। किमन्यदपेक्षणीयं सुखजीवनाय। एवं कर्तुं मम मतिर्नासीत्। तत्र कः संशयोऽहं मूढ इत्यत्र। मम परिजनस्याप्येवमेवाभिप्राय इति मे प्रतिभाति। सौजन्यविशेषेण यद्यपि यत्किमप्यप्रियं नाविष्क्रियते तथाऽपि तदा तदा अपेक्षितं संविधातु-मशक्त्या तूष्णीके मयि, तन्मुखे दृष्टोऽप्रसादः तदीयं भावमावेदयति। लोकस्य परिष्कारे ममोद्यमः। मामेव तु परिष्करणीयावस्थं मन्यते लोकः। दृढसङ्कल्पेन चिरं कथंचिदनुवर्तितस्यापि प्रयत्नस्य सर्वथा कुण्ठितत्वात् स्वात्मानं प्रत्येव सम्प्रति भूयिष्ठं चिन्ता प्रसरति। तत्र कथं हासो न भवतु? न परं यत्नो विफलः मनोरथो भग्नः, प्रत्युत असामर्थ्यप्रथा महती। अये कीदृशी लीला भगवतः!।

सत्यमेवमात्मानं मे आत्मा हसति। तथाऽपि सद्यः एवंविधाया

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

दशायाः कश्चन विपर्यासो भवति । एकान्ते प्रतिबोधनं क्रियमाणं शृणोमीव 'मत्तः स्मृतिर्ज्ञानमपोहनं च—' इत्युक्तवता भगवतैव नूनं तेन भाव्यम् । तदहमात्मानमेवमाश्वासयामि । यदहं प्रयत्नमकरवं न तत्र परम्परयाऽपि आत्मगामि किमपि फलमुद्दिष्टम् । तस्मिन् स्थिते खलु तदलाभेन शोको लज्जा वा भवितुमर्हति । यस्तु लोकोपकारः स नूनं महत्फलम् । किं तु तस्मिन् साधयितुमशक्ये को मम शोकः का मम लज्जाः । लोकोपकार इति भगवदाराधनमिति च पर्यायशब्दाविति विवेकिनः । स्वयं चेत् स्वाराधने प्रवृत्तं मां भगवान् वन्ध्यप्रयत्नं करोति, तादृशस्तस्य सङ्कल्प इत्युदासीनेन भवितव्यम् । 'प्रवर्तितव्यम्' इति बुद्धिमदात्; प्रावर्तिषि । अन्ते फलं न ददाति - न ददातु । स्वतन्त्रे सर्वज्ञे तस्मिन् ददति अददति वा न वयं किञ्चित् अनुयोक्तुमर्हामः । जनाः पुनर्हसन्ति । काममस्तु तेषां परिहासः । अयं मे कोऽपि परमो लाभः यदनया प्रवृत्त्या - 'लोकस्यायं स्वभावः । एवमूर्जितो विषयासङ्गः' — इति किञ्चित् व्युत्पन्नमतिरस्मि । यच्च जनेषु कुत्सयत्स्वपि, कुप्यत्स्वपि, अनाद्रियमाणेष्वपि, परिवादतत्परेष्वपि यथा चित्तं न विक्रियेत तथा भवितव्यम् इति मतिरिदानीं मे सम्पन्ना ।

परार्थफलजन्मानो न स्युर्मार्गद्रुमा इव ।
तापच्छिदो महान्तश्चेत् जीर्णारण्यं जगद्भवेत् ॥

வேண்டப்படாமலும், பயனைக் கருதாமலும் சாலையோர மரங்கள் நிழலையும், காற்றையும் கொடுத்து, வழிச் செல்வோரை இனிதே உபசரிக்கின்றன. அவற்றைப் போல் பிறர் ஸேவையே பிறவிப் பயன் எனக் கருதி, தாமாகவே பிறரின் துயர் தீர்க்கும் சான்றோர் இல்லாமலிருந்துவிட்டால் பாழான காடாவே ஆகிவிடும் உலகம். —ஸோமதேவர் - கதாஸரித்ஸாகரம்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

चाटुगाथाचतुश्शती-२०

305. दिशत्यपायं हि सतामपक्रमः ।

நல்லோர் முறை தவற நேர்ந்தால், பேராபத்தை விளவிக்கும்.

306. दिशः स्वराः परे चान्ये ज्ञायन्ते तेन किं फलम् ।
तज्ज्ञानं किं स को ज्ञाता न विद्मोऽज्ञास्तदा वयम् ॥

திசையறிவோ, இசையறிவோ, இயலறிவோ அறிவல்ல. அறிவையும், அறிகிறவனையும் அறிவதே அறிவு. அவற்றையறியாவிடில் நாம் அறிவிலிகளே !

307. दीनवागभ्रमारोहेत्किम् ।

ஏழையின் சொல் அம்பலம் ஏறுமா?

308. दीर्घौ बुद्धिमतो बाहू स ताभ्यां हन्ति हिंसितः ।

புத்தி கூர்மையுள்ளவன் துன்புறுத்தப்பட்டால் நறுக்கி விடுவான், ஏனேனில் அவனது கைகளும் நீண்டவையாயிற்றே !

309. दुर्जनस्य विभवं दिने दिने वर्धमानमतिवर्धते मदः ।

துஷ்டனுக்கு செல்வம் வளர வளர, திமிரும் வெகுவாக வளரும்.

310. दुःसाहसाल्लब्धपदो नीचः प्रायेण दुःसहो भवति ।

கெட்ட துணிச்சலுடன் பெரும் பதவியும் பெற்றுவிட்டால் நீசன், பெரும்பாலும் தாங்க முடியாதவனாகி விடுவான்.

311. दुष्करं किं महात्मनाम् ।

பெருமனம்படைத்தவருக்கு செயற்கரியது ஏதுமில்லை.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

312. दुष्टं चेतः साशङ्कं स्यात्।

குற்றமுள்ள நெஞ்சு குறுகுறுக்கும்.

313. दृष्टकर्मफला विद्या शीलवृत्तफलं श्रुतम्।
रतिपुत्रफला दाराः दत्तभुक्तफलं धनम्॥

நன்கு அறியவும் செயல்படவும் பயன்படுவதே கல்வி. நற்குணம், நல்லொழுக்கம்பெற பயன்படுவதே கேள்வியறிவு. இல்லற சுகம், நன்மக்கள் பெற உதவுவாளே மனைவி, ஈந்தும், நுகர்ந்தும் பயன்படுவதே செல்வம்.

314. दृष्टं किमपि लोकेऽस्मिन् न निर्दोषं न निर्गुणम्।

குற்றமற்றதும், குணமற்றதுமான ஒன்று இவ்வுலகில் காண்பதற்கரியது.

315. दृष्टारनालं स्थलमद्रिरेशः दृष्टौदनं स्थानममर्त्यपत्तनम्।

குறுகல் நெரிசல் இல்லாத இடமே இமயம்; சோறு கிடைத்த இடமே சுவர்கம்.

316. देवी समागता स्थित्यै ग्रामस्थां निरवासयत्।

ஒண்டவந்த மிடாரி ஊர்ப் பிடாரியை விரட்டியது.

317. दैर्घ्यं बाह्वोरेव, येषां न वैरे; तैक्ष्ण्यं बुद्धावेव दृष्टं, न वाचि।
मान्द्यं हासे, मानसे नैव, विज्ञाः ! तानेवाहुः संश्रयार्हान्विपत्तौ॥

எவர்க்குப் பகைமையில் இல்லாமல் கைகளில் மட்டுமே நீள்மை இருக்கிறதோ, எவர்க்கு பேச்சில் இல்லாமல் புத்தியில் மட்டுமே கூர்மை உள்ளதோ, எவர்க்கு மனதளவில் இல்லாமல் சிரிப்பில் மட்டுமே மென்மை இருக்கிறதோ அவர்களே, ஏ அறிவாளி களே! இன்னல் நேரத்தில் நாடத்தகுந்தவர் எனப் பெரியோர் கூறுகின்றனர்.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

318. दैवं निहत्य कुरु पौरुषमात्मशक्त्या।

அதிர்ஷ்டத்தை விரட்டி, ஆத்மபலத்துடன் முயற்சியை மேற்கொள்.

319. दैवे दुर्जनतां गते तृणमपि प्रायेण वज्रायते।

அதிர்ஷ்டம் கெட்டவர்போல் வாளாவிருந்தால், புல்லுங்கூட பெரும்பாலும் பலம் பெற்று வஜ்ரம்போல் ஆகிவிடும்.

320. द्युतिं सैंही किं श्वा धृतकनकमालोऽपि लभते ?।

தங்கச் சங்கிலியணிந்திருந்தாலும் நாய், சிங்கத்தின் கழுத்தைப் பெறமுடியுமா?

321. द्रष्टुं व्रणं करगतं मुकुरः किमर्थम् ?।

கைப் புண்ணைக் காணக் கண்ணாடி எதற்கு ?

322. धातुषु क्षीयमाणेषु शमःकस्य न जायते ?।

தாதுபலம் குறையும்பொழுது யாருக்குத்தான் பொறுமை வராது ?

323. धावन्तं ग्राममनुधावेत्।

ஓடும் ஸமூஹத்தையனுசரித்து ஓட வேண்டியதுதான்.

324. न कतकं पङ्कप्रसादनाय।

சேற்றைத் தெளிவிக்க தேத்தான்கொட்டை போதாது.

325. न चापि सर्वं नवमित्यवद्यम्।

'புதிது' என்பதால் எல்லாம் குறைபட்டதாகாது.

326. न जहाति महौजस्कं मानप्रांशुमलङ्घ्यता।

தன் மானமும் தக்க பலமும் கொண்டவன் புறக்கணிக்கத் தக்கவனில்லை.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

चण्डीशतकम्।

बाहूत्क्षेपसमुल्लसत्कुचतटं प्रान्तस्फुटत्कञ्चुकं
गम्भीरोदरनाभिमण्डलगलत्काञ्चीधृताधांशुकम्।
पार्वत्या महिषासुरव्यतिकरे व्यायामरम्यं वपुः
पर्यस्तावधिबन्धबन्धुरलसत्केशोच्चयं पातु वः ॥ ७२

महिषासुरव्यतिकरे बाहूत्क्षेपसमुल्लसत्कुचतटम्, प्रान्तस्फुटत् - कञ्चुकम्, गम्भीरोदरनाभिमण्डलगलत्काञ्चीधृताधांशुकम्, व्यायामरम्यं, पर्यस्तावधिबन्धबन्धुरलसत्केशोच्चयं पार्वत्या वपुर्वः पातु ॥

மஹிஷாஸுரனை வதைக்கும் அந்த வேளையில் பலபடியாக வருத்தி களைத்திருந்தும் அழகான பார்வதியின் தேஹம் உங்களை காப்பாற்றட்டும். எப்படி தேகம் களைத்தும் அழகாக இருக்கிறது? முன்னும் பின்னும் மேலும் கீழுமாக கைகளை வளைத்து தூக்க நேரும்பொழுது கைக் கிடையில் ஸ்தனங்கள் பளிச்சிடுகின்றன. பக்கவாட்டில் சோளி நன்கு தெரிகிறது. ஆழமான நாபி மண்டலத்தினிடையில் தளருகின்ற கீழாடையை சட்டென தாங்கி நிற்கிறது ஒட்டியாணம். நுனி முடிச்சு அவிழ்ந்த பின்னும் கொண்டை அவிழாததுபோல் விளங்கும் கேசக் கற்றையும் கொண்டு நின்றாள். அந்த பார்வதியின் தேஹப்ரயாசையும், அழகும் குறையாத தேஹம் பக்தர்களை காப்பது நிச்சயம்!

चक्रं चक्रायुधस्य क्वणति निपतितं रोमणि ग्रावणीव
स्थाणोर्बाणश्च लेभे प्रतिहतिमुरुणा चर्मणा वर्मणेव।
यस्येति क्रोधगर्भं हसितहरिहरा तस्य गीर्वाणशत्रोः
पायात्पादेन मृत्युं महिषतनुभृतः कुर्वती पार्वती वः ॥ ७३

क्रोधगर्भं इति हसितहरिहरा महिषतनुभृतस्तस्य गीर्वाणशत्रोर्मृत्युं पादेन कुर्वती पार्वती वः पायात्। इतीति किम्। ग्रावणि पाषाणे इव यस्य

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रोमणि, अर्धान्महिषस्य निपतितं चक्रायुधस्य चक्रं क्षणति । स्थाणोः शिवस्य बाणश्च उरुणा चर्मणा वर्मणा कवचेनेव प्रतिहतिं प्रतिघातं लेभे । विष्णोश्च क्रमस्य रोममपि नाच्छिनत् । शिवस्य बाणश्चास्य चर्ममात्रमपि नाभिनदिति भावः ॥

எருமைக்கடாவேஷம் பூண்ட அசுரனை காலால் உதைத்து நசுக்கினாள் பார்வதீ. அப்பொழுது ஒரு கணம் கோபத்துடன் விஷ்ணுவையும், சிவனையும் வெட்கமடையப் பார்த்தாள். அதன் பொருள் என்னவென்றால் விஷ்ணுவின் சக்ராயுதம் மஹிஷனின் உடல்ரோமத்தில் மட்டுமே பாராங்கல்லில் போல் உராயந்து 'விர்' என ஒலித்துநின்று விட்டதே. சிவனுடைய பாணம் கூட மஹிஷனின் தோலில் பட்டு கவசத்தில் பட்டதுபோல் திரும்பிவிட்டதே ! என்பதாகும்.

कृत्वा वक्त्रेन्दुबिम्बं चलदलकलसद्भ्रूलताचापभङ्गं
क्षोभव्यालोलतारं स्फुरदरुणरुचिस्फारपर्यन्तचक्षुः ।
संध्यासेवापराद्धं भवमिव पुरतो वामपादाम्बुजेन
क्षिप्रं दैत्यं क्षिपन्ती महिषितवपुषं पार्वती वः पुनातु ॥ ७४

संध्यायां: सेवा तयापराद्धं कृतापराधं भवं शिवमिव वामपादाम्बुजेन महिषितवपुषं दैत्यं पुरतः क्षिप्रं क्षिपन्ती पार्वती वः पुनातु । किं कृत्वा । चलदलकलसद्भ्रूलताचापभङ्गं क्षोभव्यालोलतारं स्फुरदरुणरुचिस्फारपर्यन्तचक्षुर्वक्त्रेन्दुबिम्बं कृत्वा ॥

ஸந்த்யாகால சேவையில் குற்றமிழைத்த சிவனைப் போல் தன் இடது திருவடித்தாமரையால் உதைத்துத் தள்ளிய மஹிஷாசுரனை வதைத்த பார்வதீ தேவி உங்களையும் தூய்மை பெறச் செய்யட்டும். அவ்வரிய நேரத்தில் தேவியின் மதியெனத் திகழும் முகத்தைப் பார்க்க வேண்டுமே ! எப்படி இருந்தது முகம் ? பக்கவாட்டில் தவழும் தலைமுடியினிடையே வில்லென வளையும் புருவக்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

கொடியும், நெருக்கடிக் கருதி சுற்றிச் சுழலும் கருவிழியும், செக்கச் சிவந்த கடைக் கண்ணும் கொண்டல்லவா திகழ்ந்தது அந்த முகம் !

गङ्गासम्पर्कदुष्यत्कमलवनसमुद्धूतधूलीविचित्रो
वाञ्छासंपूर्णभावादधिकतररसं तूर्णमायान्समीपम् ।
क्षिप्तः पादेन दूरं वृषग इव यया वामपादाभिलाषी
देवारिः कैतवाविष्कृतमहिषवपुः सावतादम्बिका वः ॥ ७५

कैतवाविष्कृतमहिषवपुर्देवारिर्यया वृषगः शिव इव पादेन दूरं क्षिप्तः साम्बिका वोऽवतात् । कथंभूतो देवारिर्वृषगश्च । गङ्गासम्पर्क-दुष्यत्कमलवनसमुद्धूतधूलीविचित्रः । पुनः कथंभूतः । वाञ्छा-सम्पूर्णभावादधिकतररसं यथा स्यादेवं तूर्णं समीपमाया-नागच्छन् । पुनः कथंभूतः । वामपादाभिलाषी । प्रसादयितुमपकर्तुं च । वामपादे तु कामः ॥

பொய்யாக மஹிஷ உருவங்கொண்ட தேவர்களின் பகைவனே காலால் உதைத்து வதைத்த அம்பிகை உங்களை காப்பாளாக ! ஒரு விதத்தில் அந்த அசுரனும், சிவனும் ஒத்திருந்தனர். எப்படி? மஹிஷன் (எருமை) கங்கையில் தாவிக் குதித்து வீணாக்கிய தாமரைக் கூட்டத்தின் மகரந்தப் பொடிகள் தூவப் பெற்று வேஷம் மாறியிருந்தான். சிவனோ கங்காதேவியோடு இணைந்தபோது மார்பு பாகத்தில் விபூதி அழிந்து ''இவர் யாரோ'' என்று நினைக்கத் தோற்றமளித்தார். இன்னும் தன்னிஷ்டம் நினைவேறிய களிப்பில் வேகமாக அருகில் வருகிறார்கள் இருவரும். இருவரும் தேவியின் இடது திருவடியை – ஒருவர் சேவிக்கவும், அசுரன் மாசுறுத்தவும் வேண்டி - விரும்புகின்றனர்.

भद्रे भ्रूचापमेतन्नमयसि नु वृथा विस्फुरन्नेत्रबाणं
नाहं केलौ रहस्ये प्रतियुवतिकृतख्यातिदोषः पिनाकी ।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

देवी सोत्प्रासमेवं धृतमहिषतनुं दृप्तमन्तःसकोपं
देवारिं पातु युष्मानतिपरुषपदा निघ्नती भद्रकाली ।। ७६

एवं सोत्प्रासं दृप्तमन्तःसकोपं धृतमहिषतनुं देवारिमतिपरुष-पदात्यन्तकठोरचरणेन निघ्नती भद्रकाली देवी युष्मान्पातु। एवं कथम्। हे भद्र, विस्फुरन्नेत्रबाणमेतद्भ्रूचापं वृथा नमयसि नु । रहस्ये केलौ प्रतियुवत्याः सपत्न्याः कृतः ख्यातिदोषो येन तादृशः पिनाकी नाहम्। नाहं कृतगोत्रस्खलनः शिव इति भावः ॥

அசுரன் மஹிஷ உருக்கொண்டு சற்று ஏளனச் சிறிப்புடன், ஆஞல் உண்மையில் கொடுங் கோபத்துடன் அணுகினான். அவனை மிகக் கொடிய தனது காலால் உதைத்து அழித்த பத்ரகாளிகாதேவி உங்களைக் காப்பாற்றட்டும். அந்த சமயத்தில் அவன் ஏளனமாக தேவியிடம் கூறியது என்ன தெரியுமா ? அம்மே ! பள பளக்கும் கண்ணம்புடன் பறந்துவரும் இந்த புருவவில்லை வீணாக வல்லவா வளைக்கிறாய். நான் தனிமையில் கூடி மகிழும்பொழுது பிறர் மனைப் பெயர் சொல்லி (கோத்ரஸ்கலனம்) குற்றமிழைத்த சிவனல்லவே ! என்றான்.

अन्योन्यासङ्गगाढव्यतिकरदलितभ्रष्टकापालमाला
स्वां भोः संत्यज्य शम्भौ खुरपुटदलितप्रोल्लसद्धूलिपाण्डुः ।
भद्रे क्रीडाभिमर्दी तव सविधमहं कामतः प्राप्त ईशो-
ऽत्रैव सोत्प्रासमव्यान्महिषसुररिपुं निघ्नती पार्वती वः ।। ७७

एवं सोत्प्रासं महिषसुररिपुं निघ्नती पार्वती वोऽव्यात्। एवं कथम्। भो भद्रे, अन्योन्यासङ्गेन यो गाढव्यतिकरस्तस्मिन्दलिता अत एव भ्रष्टा या कपालसंबन्धिनी माला तां स्वां मालां शम्भौ संत्यज्य खुरपुटदलितप्रोल्लसद्धूलिपाण्डुः । क्रीडयाभिमर्दो गाढालिङ्गनम्, पक्षे सङ्ग्रामः स यस्य सोऽहमीशस्तव सविधं कामतोऽत्र प्राप्तः ॥

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ஓ நல்ல குணமுள்ளவளே ! நாங்கள் ஒருவருக் கொருவர் நெருக்கிப் பிணைந்து போரிட்ட பொழுது அறுந்து சிதறிய கபால மாலையை சிவனிடமே விட்டு விட்டு, குளம்பு வைப்பால் பொடியாகி மேலே கிளம்பிய தூசியால் வெளிரிட்டவனாய் நான் காமத்துடன் உன்னுடன் காடா லிங்கனம் வேண்டி (போர் தொடுக்க வேண்டி) இங்கு வந்துள்ளேன்– என்று ஏளனச் சிரிப்புடன் கூறும் மஹிஷாசுரனை துகைத்த பார்வதீ தேவி உங்களை காப்பாற்றட்டும்.

ज्वालाधाराकरालं ध्वनितकृतभयं यं प्रभेत्तुं न शक्तं
चक्रं विष्णोर्दधास्रि प्रतिविहतरसं दैत्यमालाविनाशि ।
क्षुण्णस्तस्यास्थिसारो विबुधरिपुपतेः पादपातेन यस्या
रुद्राणी पातु सा वः प्रशमितसकलोपप्लवा निर्विघातम् ॥८७

सा प्रशमितसकलोपप्लवा रुद्राणी निर्विघातं वः पातु । सा का । यस्याः पादपातेन तस्य विबुधरिपुपतेर्महिषस्यास्थिसारः क्षुण्णः पिष्टः । तस्य कस्य । ज्वालाधाराकरालं ध्वनितकृतभयं दैत्यमालाविनाशि विष्णोश्चक्रं प्रतिविहतरयं सत् यं प्रभेत्तुं न शक्तम् ॥

ருத்ராணீ தேவி தனது கால் உதையால் மஹிஷனின் பலமான எலும்பை பொடியாக்கினாள். அவ்வாறு செய்து அனைவரது இன்னல்களையும் தடையின்றி போக்கினாள். அந்த தேவி உங்களை காப்பாற்றட்டும். முன்னதாக விஷ்ணு, ஜ்வாலைத் தொடரால் பயங்கரமானதும், ஒலி எழுப்பி பயமுறுத்துவதும், உறுதியான ஆரங்களைக் கொண்டதும், எத்தனையோ அசுரர்களை அழித்ததுமான சக்ராயுதத்தை ப்ரயோகித்தபோதும், அது வேகமடங்கி, அந்த மஹிஷனை பிளந்தொழிக்க முடியால் திரும்பிவிட்டது.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

किं कष्टं व्यवसायिनाम् ? ।

—मधुकरः

बालः -अम्ब पिपासा बलवती । जिह्वां शोषयति । किं नु खलु पातुं पानीयं मे किंचिन्न दास्यसि ? ।

जननी -तात ! इयं ददामि । कुतो नु नाम पूर्वमेव न प्रार्थितवान्? । किं तपस्विना जिह्वाशोषपर्यन्तं तूष्णीं स्थातव्यम्। क्षणं तिष्ठ तावत् । अभिनवं तीर्थं कूपात् उद्धृत्य दास्यामि । स्वच्छं शीतलं भवेत् ।

बालः -आमम्ब ! । महान् विलम्बो भविष्यति । पात्रमन्विष्य, रज्जुं आसज्य, अन्तर्मुक्त्वा, आकृष्याकृष्य, प्रहृत्य, जलं पूरयित्वा, उद्धृत्य, रज्जुग्रन्थिं विस्रस्य, ततः परं कंसे निनीय तीर्थमानेष्यसि । कियान्कालो भवेत् । पश्य ।

जननी -सर्वं क्षणेन भविष्यति । मा भैषीः । वाचा विस्तरं कुर्वन् क्रियायां विलम्बो भविष्यति इति मन्यसे । तथा न ।

बालः -(आनीतं जलं पीत्वा) तीर्थं पर्याप्तम्। कुतोऽम्ब कूपे तीर्थं अगाधे वर्तते । नद्यां पश्य उत्तानं तीर्थम् । सर्वैः अनायासेन हस्तेन आदाय पातुं शक्यम्। तथा कथं सर्वत्र न भवति ? ।

जननी -तात ! प्रश्नं सुखं अप्राक्षीः । उत्तरं क्लेशेन वक्तव्यम्। तथाऽपि तत् हृदयङ्गमं भविष्यति न वा, वदामि । कूपो गृहस्यान्तरेव वर्तते । नदी पुनः कियति दूरे । यद्यत्र उद्धरणक्लेशो भवति, नदीतीर्थे गमनक्लेशो भवति । शर्करिलेन मार्गेण आतपे गन्तव्यम्। सर्वथा क्लेशं विना किमत्र लभ्यम्। न हि अलसानां अभिमतलाभं सुलभं भगवान् संकल्पयति ! । अन्यदपि किंचित् त्वं आलोचयतु । नद्याः सलिले सर्वो जनोऽवतरति । पाणिपादं

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

क्षालयति। निष्ठीवति। अन्यथाऽपि बहुधा अशुद्धिमापादयति। अगाधे स्थितस्य तु कूपजलस्य नैव तथा अशुद्धिप्रसङ्गः भवति। अपि च ग्रीष्मे नदी अत्यन्तं शुष्का भवति। अगाधजलस्तु कूपो न तथा। तस्मात् आपाततः कश्चित् गुणो दृश्यत इति तावन्मात्रेण क्वापि पक्षपातो न कर्तव्यः। नापि क्वचित् किञ्चित् असौकर्यं दृश्यत इति तत्रानादरः कार्यः। सर्वं क्षमया सम्यक् पर्यालोचनीयम्। व्यवसायिभिस्सदा भवितव्यम्।

அன்பார்ந்த வாசகர்களே !

ஸம்ஸ்க்ருதஶ்ரீ சந்தாவை உரிய காலத்தில் செலுத்த மறக்க வேண்டாம். வருஷ சந்தா செலுத்த மறந்துவிட நேரிடும். ஆகவே, ஆயுள் சந்தாவாக மாற்றிவிடவும்.

—ஆசிரியர்

यो यं जनापकरणाय सृजत्युपायं
तेनैव तस्य नियमेन भवेद्विनाशः।
धूमं प्रवाति नयनान्ध्यकरं यमग्निः
भूत्वाम्बुदः स शमयेत् सलिलैस्तमेव॥

ஒருவன், பிறருக்கெதிராக தொல்லை கொடுக்கும் திட்டத்தை தோற்றுவித்தான் என்றால் அவனுக்கு அதுவே அழிவைதேடித் தரும். கண்ணை மூடிக் கொள்ளுமளவிற்கு ஒரு புகையை கிளப்பியது தீ. அந்த புகை என்ன செய்கிறது தெரியுமா? மேகமாக ஆகி அந்த மேகம் மழைபொழிய, தீயை முழுதும் அணைத்து விடுகிறதே !

—ராஜதரங்கிணி - கல்ஹணர்

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

रूपात् गुणो गरीयान् !

—मधुकरः।

श्री रामार्यः आढ्ये महाकुले जातः। दृश्यरूपः। यथाकालं कृतसर्वसंस्कारः विद्यायां विनीतमतिश्चासीत्। इयत्यां सामग्र्यां विद्यमानायां तस्य आत्मनि कश्चन बहुमानः आसीत् इत्यत्र न किञ्चिदाश्चर्यम्। विवाहार्हे वयसि प्राप्ते वरगुणान् पुष्कलान् तस्मिन् दृष्ट्वा बहवः कन्यां दातु मैच्छन्। यथा कन्या तथा वरोऽपि रूपं वरयते एव। रूपमेव च प्रायो वरयते।

तथा श्री रामार्योऽपि सुन्दरीं कांचन कन्यां परिणेतुमियेष। परं तु अद्यत्व इव पूर्वं पुत्राः पितरि न धृष्टा आसन्। विवाहविषये स्वाभिप्रायं कमपि प्रकाशयितुं नैव तेषां प्रवृत्तिरभवत्। निर्बध्य बन्धुभिः पृष्टा अपि न किंचिदुत्तरमदुः। पितरौ सर्वं जानाते, शोभनमेव करिष्यतः इति विनयेन तूष्णींभावं भेजिरे। श्रीरामार्यस्य एकान्तरितो मातुलः स्वकन्यां कमलामस्मै दित्सति स्म। न तथा सा रूपवती। रूपे विशिष्य दत्तदृष्टीनां सा कुरूपेत्येव मतिर्भवेत्। तथाऽपि तस्याः पित्रा सानुरोधं प्रार्थितः श्रीरामार्यस्य पिता बन्धुप्रियत्वात् तां पुत्रार्थे प्रतिग्रहितुं अन्वमन्यत। विवाहो निर्वृत्तः। सा यथाकालं भर्तृगृहमाजगाम।

सा कुटुम्बकार्याणि सम्यङ्निरवर्तयत्। श्वशुरयोः भर्तुश्च शुश्रूषां सम्यक् चकार। सम्यगुपाचचार। सम्यगपचत्। न वस्तूनामर्थे अनुचितमल्पमपि व्ययमकरोत्। बन्धून्सर्वान् यथावदुपचचार। कर्मकरानाद्रियत। सारतः शुश्रूषस्व गुरून् ..... इति कालिदासोक्तं कुलवधूचरितं सम्पूर्णं स्वयमाचचार। पुत्रान् पुत्रीश्च (बहुवचनं माऽस्तु चेन्माऽस्तु) यथाकालं प्राप्तवती।

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

एवमपि रामार्यस्य तस्यां मनागपि प्रीतिर्नासीत् । सर्वदा तस्यामप्रसन्नमुखः । प्रायो न सम्भाषणम् । कदाचित् भाषणे प्रवृत्तेऽपि सर्वावज्ञा तत्राभिव्यक्ता बभूव । कश्चन जन्तुः - इत्येव तां प्रति परिगणना तस्य । इयताऽपि नावशेषिता विमानना । सुहृदां समक्षमपि अवधीरिता सा । इदं सर्वं महान्तं क्लेशमजनयत् तस्या मनसि । कथंचित् सेहे ।

रामार्यः कस्यांचित्कलाशालायामुपाध्यायः । नद्यास्तीरान्तरे कलाशाला । कदाचित् व्याधिग्रस्तोऽभवदयमुपाध्यायः । तथाऽपि क्षणमपि उद्योगाद्विरन्तुं नैच्छत्सः । शकटं कृत्वा कलाशालां गच्छन् आसीत् । तत्र गतस्य पदे पदे तीर्थम्, आहारः अन्यच्च बहु अपेक्षितमभवत् । दूरे गृहम् । नद्यां नखंपचासु सिकतासु असकृत् गन्तव्यमागन्तव्यं च । अथाऽपि यस्मिन् क्षणे यदपेक्षितं तत्सर्वं सज्जं कृत्वा, अपेक्षाक्षणमिङ्गितेन ज्ञात्वा कमला ददौ । न गतागताभ्यां, न जागरणेन, नान्येन हेतुना सा अल्पमपि क्लेशमदर्शयत् । सर्वदा सन्निहिता भूत्वा उपचचार । निद्राणस्यापि व्यजनं वा वीजयति स्म; अङ्गानि वा मृदु ममार्ज । प्रबुद्धस्य इङ्गितेनैवापेक्षितं ज्ञात्वा ददौ परमेण प्रेम्णा परमेण आदरेण । एवं कृता शुश्रूषा रामार्यस्य मनसि महान्तं विपर्ययं जनयामास । तस्यामिदानीमल्पेतरा प्रीतिरुदभवत् । एतावन्तो गुणा अन्यस्यां कस्यां दृश्येरन् इत्यन्तरतुष्यत् । इयन्तं कालं अस्यां क्रूरोऽहमासं बत इत्यखिद्यत । रूपस्य अस्मिन् समये कः उपयोगः ? । गुणाश्चेन्न स्युः सर्वदा क्लेशो भवेत् । 'मूढोऽहं बत आसम्' - इति तदानीमेव विवेकिनमात्मानं मेने । यं यमपश्यत् तस्य तस्य पुरस्तात् मन्दीभूतलज्जः पत्नीगुणानश्लाघत । व्याधिनाऽस्य बहूपकृतम् ।

व्याधिं विनाऽपि सर्वेषामेव गुणेष्वधिक आदरो यथा भवेत् तथा जनस्य विवेकसम्पत्तौ समुचितमुपायमभिज्ञा लभेरन् । तदैव तत्साधुकृतं भवति ।

—★—

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

विशिष्टा वार्ता

गतवत्सरेष्विव ऐषमवत्सरेऽपि भारतराष्ट्रपतिना संस्कृत-शास्त्र-पण्डिताः पुरस्कृताः बिरुदादिभिः । ब्रह्मश्रीमन्तः अनन्तनारायण-सोमयाजीमहाशयाः, चक्रवर्ती-आचार्याः, नावल्पाक्कम् वरदाचार्याः, लक्ष्मीनरसिंहभट्टाः - इत्येते राष्ट्रपतिपुरस्कारेण समाजिताः सादरं अभिनन्दिताः (चेन्नै) संस्कृतकला-शालायामायोजिते समारोहे आर्षज्ञानशेवधीनां पूज्यश्री पेजावर-मठाधीशानामाध्यक्ष्ये । सम्मेलनेऽस्मिन् समन्वयभाजस्सर्वे सहृदया आत्मानुभाव्यतुष्टिनिर्भरा 'अहोभाग्यं' मेनिरे यदयं त्रिमतावलम्बिशास्त्रपण्डितमण्डलीसमागमः त्रिवेणीसमागम इव महामहनीय-स्समजनि ।

सप्रणयमधुरं स्वागतं समर्पयन्, मद्रकलाशालाप्रांशुपालः श्री देवीप्रसादमहोदयः कवितामयं संस्कृतभाषामाहात्म्यं जिगाय । तदवसरे प्रभाषमाणः भूतपूर्वप्रांशुपालः ब्रह्मश्रीकृष्णरमूर्तिशास्त्री 'व्यवहारयोग्या भाषैव संस्कृतम्' - इति सयुक्तिकं प्रतिपेदे । चोलवंश्यशासकाः, तत्र तत्र घटिकास्थानप्रतिष्ठापनेन समुचितं संस्कृतशात्राध्यापनकार्यं निरवाहयन् इति प्रत्यपादयत् सरसप्रवक्ता अद्वैताचार्यः श्री वीषिनाथमहोदयः ।

आध्यक्ष्यं निर्वहन्तः पूज्यश्री पेजावारपीठाधिपतयः अतिगम्भीरे स्वप्रभाषणे न्यरूपयन्—

1. राष्ट्रपतिपुरस्कारः पुरस्कृतः यदनेन शास्त्रनिष्णाताः पुरस्क्रियन्ते ।
2. मूले जलसेचनं शाखाप्रसारमप्रतिहतं करोति; मूलं च संस्कृतम् ।
3. भारतीयविज्ञानकमलविकासाय संस्कृतसूर्यस्य निरन्तरप्रकाशः स्पृहणीयः इत्यादि । यथायोगमभिनन्दिताः राष्ट्रपतिपुरस्कार-भाजस्तदानीम् ।

—श्रीमती लोकनायिका

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

ஸம்ஸ்க்ருதத்தை எளிதில் கற்க
எமது பாட நூல்கள்

1.	ஸம்ஸ்க்ருதஶ்ரீ பாடமாலா 1—7 பாகங்கள் ஒவ்வொன்றும்	25/-
2.	ஸம்ஸ்க்ருதஶ்ரீ அகராதி (Dictionary Sanskrit-Tamil) தமிழ்-ஆங்கிலப் பொருளுடன்	120/-
3.	தாதுமாலா (300 தாதுக்கள்) (முதல் பாகம்)	80/-
4.	சப்தமஞ்ஜரீ	25/-
5.	ஸம்ஸ்க்ருதஶ்ரீ ஆண்டிதழ்கள்	
6.	13 முதல் 21 வரை	15/-
7.	22 முதல் 25 வரை	20/-
8.	ஸம்ஸ்க்ருதஶ்ரீ வெள்ளிவிழா மலர்	20/-
9.	ஸம்ஸ்க்ருதஶ்ரீ மாதப் பத்திரிகை	4/-
10.	ஆண்டு சந்தா	40/-
11.	ஆயுள் சந்தா	400/-

புத்தகம் அனுப்ப தபால் செலவு தனி

விவரமறிந்து முன் பணம் அனுப்பவும்

தொடர்புகொள்ள முகவரி :-

ஸம்ஸ்க்ருத எஜுகேஷன் ஸொஸைடி

148-150, லஸ் சர்ச் ரோடு,

மயிலாப்பூர், சென்னை-4

Phone : 2466 14 01

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

'Hi- Energy' Silver Zinc
Nickel Cadmium Cells

UNIQUE FEATURES

High Energy Density * Capability of very High rate discharge * Long life * Economical * Extremely Rugged * Wide Range

For further details please contact / write to:

High Energy Batteries (India) Limited
(FORMERLY SIMCO METTERS LTD. BATTERY DIVISION)
MATHUR - 622 515
(PUDUKKOTTAI DISTRICT)
Regd. Office:
Eswin House, Perungudi, Chennai - 600 096

With best Compliments

SRI S.V. PARASURAMAN
(Proprietor)

RAM ENTERPRISES
Mylapore, Chennai - 4
Dealer :

Hindustan Petrolium Corporation Ltd.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,

Vaidika Pandit Sri V Hariharan Collection, Sholinganallur, Chennai

Date of Publication : 10th of every month
Registration No. TN/PMG (CCR) / 477 / 06 - 08 WPP 289 / 06 - 08
Posting Dates On 15, 16
Registration with Register News Paper of India 30478 / 77
SAMSKRITASRI

With best compliments from :

LITEROOF

(Poineers in Manufacture of Asphaltic Corrugated & Plain Roofing Sheets)

NEW TUF-10 SER

(Janatha - Deluxe - Expodel Expo - 10

LITEROOF

IS

(Economical * Flexible * Durable * Weather Proof

* Fire-Resistant

LITEROOF

FOR

*Factories - Theatres * Schools * Housing * Poultry *

Dairy Farms etc.,

LR

LIGHT ROOFINGS LIMITED

'LITEROOF CENTRE' CHENNAI - 600 086.

Ph : 827 07 25/36/57 Telex : 0416567 LR IN

Fax No. 826 25 86

Printed by : Zigma Graphics, 9/1, Sitharappan Street, Triplicane-5
Edited and Published by Sri S. Srinivasa Sarma on behalf of the Samskrit Education Society (Regd.)
283, T.T.K. Road, Chennai-600018.

CC-0.In Public Domain. Digitization by Muthulakshmi Research Academy,